# चतुर्थ सोपानम्

## वायुवृष्टिअध्यायः

जगतो विश्वस्यान्नं प्राणा असवः। यतः प्राणिनामन्नैर्विना प्राणा न वर्तन्ते। तच्चान्नं प्रावृट्कालस्य वर्षासमयस्यायत्तमाधीनं यस्मादतोऽस्माद्धेतोः प्रयत्नेनातिशयेन प्रावृट्कालः परीक्ष्यो विचार्य इत्यर्थः।।१।।

तस्य प्रावृट्कालस्य यानि लक्षणानि विज्ञानकाराणानि मुनिभिर्वसिष्ठादिभिर्निबद्धानि रचितानि तानि दृष्ट्वा अवलोक्य, तथा गर्गपराशरकाश्यपवज्रादिभिर्यानि रचितानि विरचि-तानि। आदिग्रहणाद्बादरायणाऽसितदेवला गृह्यन्ते। तानि सर्वाणि दृष्ट्वा मयेदं प्रावृट्काल-लक्षणं क्रियति इति।।२।।

यो दैववित् कालज्ञोऽविहितचितोऽविक्षिप्तचितः, न विहितं चित्तं यस्य, अनन्यमनाः, तत्पर इत्यर्थः। केचिदवहितचित इति पठन्ति। अविक्षिप्तचितो द्युनिशमहोरात्रं यो गर्भलक्षणे भवति तस्याम्बुनिर्देशे वृष्टिकथने मुनेर्ऋषेरिव वाणी गीर्मिथ्या निष्फला न भवतिः, अपि तु सत्यस्व-रूपा भवति। यस्मिन् दिने यस्यां वेलायां स वृष्टिमादिशति तत्र सत्यस्वरूप भवतीत्यर्थः।।३।।

अतोऽस्माद् गर्भलक्षणशास्त्राज्ज्योतिः शास्त्राद्वा अन्यदपरं शास्त्रं ज्यायः प्रशस्ततरं किं वास्ति विद्यते। यच्छास्त्रं ग्रन्थं ज्ञात्वा कलौ युगे प्रध्वंसिन्यपि सर्वशास्त्रविनाश-कर्तरि सत्यपि। यतः सर्वशास्त्राणां कलौ दिनानुदिनं ध्वंसोऽस्ति। तथाभूतेऽपि त्रिकालदर्शी भूतभविष्यद्वर्तमान-कालस्य वेत्ता भवतीत्यर्थः।।४।।

## १. गर्भलक्षणाध्यायः

तत्रादावेव प्रयोजदर्शनार्थमाह-

**अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तंम्।**
**यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन।।१।।**

जगतो विश्वस्यान्नं प्राणा असवः। यतः प्राणिनामन्नैर्विना प्राणा न वर्तन्ते। तच्चान्नं प्रावृट्कालस्य वर्षासमयस्यायत्तमाधीनं यस्मादतोऽस्माद्धेतोः प्रयत्नेनातिशयेन प्रावृट्कालः परीक्ष्यो विचार्य इत्यर्थः।

अथ तल्लक्षणानि वक्ष्यामीत्याह-

**तल्लक्षणानि मुनिभिर्यानि निबद्धानि तानि द्दष्टिवेदम्।**
**क्रियते गर्गपराशरकाश्यपवात्स्यादिरचितानि।।२।।**

तस्य प्रावृट्कालस्य यानि लक्षणानि विज्ञानकाराणानि मुनिभिर्वसिष्ठादिभिर्निबद्धानि रचितानि तानि दृष्ट्वा अवलोक्य, तथा गर्गपराशरकाश्यपवज्रादिभिर्यानि रचितानि विरचि-तानि। आदिग्रहणा-द्बादरायणाऽसितदेवला गृह्यन्ते। तानि सर्वाणि दृष्ट्वा मयेदं प्रावृट्काल-लक्षणं क्रियति इति।

अथ गर्भलक्षणज्ञस्य दैवविदः प्रशंसार्थमाह-

**दैवविदवहितचित्तो द्युनिशं यो गर्भलक्षणे भवति।**

**तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्देशे।।३।।**

यो दैववित् कालज्ञोऽविहितचितोऽविक्षिप्तचितः, न विहितं चित्तं यस्य, अनन्यमनाः, तत्पर इत्यर्थः। केचिदवहितचित इति पठन्ति। अविक्षिप्तचितो द्युनिशमहोरात्रं यो गर्भलक्षणे भवति तस्याम्बुनिर्देशे वृष्टिकथने मुनेर्ऋषेरिव वाणी गीर्मिथ्या निष्फला न भवतिः, अपि तु सत्यस्व-रूपा भवति। यस्मिन् दिने यस्यां वेलायां स वृष्टिमादिशति तत्र सत्यस्वरूप भवतीत्यर्थः।

**किं वातः परमन्यच्छास्त्रं ज्यायोऽस्ति यद्विदित्वैव।**

**प्रध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति।।४।।**

अतोऽस्माद् गर्भलक्षणशास्त्राज्ज्योतिः शास्त्राद्वा अन्यदपरं शास्त्रं ज्यायः प्रशस्ततरं किं वास्ति विद्यते। यच्छास्त्रं ग्रन्थं ज्ञात्वा कलौ युगे प्रध्वंसिन्यपि सर्वशास्त्रविनाश-कर्तरि सत्यपि। यतः सर्वशास्त्राणां कलौ दिनानुदिनं ध्वंसोऽस्ति। तथाभूतेऽपि त्रिकालदर्शी भूतभविष्यद्वर्तमानकालस्य वेत्ता भवतीत्यर्थः।

अथात्रै परमतं स्वमतं चाह-

**केचिद्वदन्ति कातिकशकलान्तमतीत्य गर्भदिवसाः स्युः।**

**ज तु तन्मतं बहूनां गर्गादीनां मतं वक्ष्ये।।५।।**

केचिदाचार्याः सिद्धसेनप्रभृतयः कार्तिकमासस्य शुक्लान्तं शुक्लपक्षावसानं पौर्णिमान्तं समतीत्याति-क्रम्य गर्भदिवसाः स्युर्भवेयुरिति वदन्ति कथयन्ति। तथा च सिद्धसेनः-

न च तन्मतं बहूनामिति। यदेतत्प्रागुक्तं कार्तिकशुक्लान्तमतीत्य गर्भदिवसाः स्युरिति, तच्च बहूनां प्रभूतानां मुनीनां न मतम्। तस्माद् गर्गादीना गर्गवसिष्ठपराशरऋषिपुत्रकश्यपानां मतं वक्ष्ये कथयिष्य इति।

तच्चाह-

**मार्गशिरशुक्लपक्षप्रतिप्रत्भृति क्षपाकरेऽषाढाम्।**

**पूर्वो वा समुपगते गर्भाणां लक्षणं ज्ञेयम्।।६।।**

मार्गशीर्षमासस्य सितपक्षप्रतिपत्प्रभृति शुक्लपक्षप्रतिपदारभ्य क्षपाकरे चन्द्रे अषाढां पूर्वा वा समुपगते पूर्वाषाढां प्राप्ते। वाशब्दोऽत्र चार्थे। मार्गशीर्षशुक्लपक्षे यदा पूर्वाषाढास्थश्चन्द्रमा भवति तदारभ्य गर्भाणां लक्षणं ज्ञेयं ज्ञातव्यमिति। तथा चात्र गर्गः-

अथ धृतस्य गर्भस्य प्रसवकालज्ञानमाह-

**यन्नक्षत्रमुपगते भर्गश्चन्द्रे भवेत् स चन्द्रवशात्।**

**पञ्चनवते दिनशते तत्रैव प्रसवमायाति।।७।।**

यो गर्भो यन्नक्षत्रमुपगते यस्मिन्नक्षत्रे व्यवस्थिते चन्द्रे भवेत् स गर्भश्चन्द्रवशाच्चन्द्र-युक्तनक्षत्रवशात् प्रसवमायाति। कियता कालेनेत्याह-

सावनं मानं प्रागस्माभिर्विशेषेण प्रदर्शितम्। संख्योपदिष्टानि यानि तानि सावनमानेनाष्टव्यानि। सावना-न्याचार्येण प्रदर्शितानि – युगवर्षमासपिण्डं रविमानं साधिमासकं चान्द्रमित्यादि। तथा चाचार्येण समाससंहितानिबन्धे स्पष्टतरमुक्तम्-

अथ पुनरपि गर्भाणां धृतानां प्रसवकालज्ञानमाह-

**सितपक्षभवाः कृष्णे शुक्ले कृष्णा द्युसम्भवा रात्रौ ।**

**नक्तं प्रभवाश्चाहनि सन्ध्याजाताश्व सन्ध्यायाम् ।।८।।**

सितपक्षभवाः शुक्लपक्षसम्भूता गर्भाः पूरतः पञ्चनवते दिनशते गते कृष्णपक्षे प्रसवमायान्ति। एवं कृष्णपक्षोद्भवाः शुक्लपक्षे। द्युसम्भवा दिनसम्भवा गर्भा रात्रौ प्रसवमायान्ति। नक्तम्प्रभवा रात्रिसम्भ-वाश्चाहनि दिवसे प्रसवमायान्ति। सन्ध्याजाताः सन्ध्यायामेव व्यत्यययाद्भवन्ति। प्राक्सन्ध्यासम्भूता अपरसन्ध्यायामपरसन्ध्यासम्भूताः प्राक्सन्ध्या-यामिति। तथा च गर्गः- **बृ.सं,पृ-३२९**

अथ गर्भाणां विशेषलक्षणं, कालनिर्देशं चाह-

**मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्लजाताश्च।**

**पौषस्य कृष्णपक्षेण निर्दिशेच्छ्रावणस्य सितम्।।९,१०,११।।**

**चैत्रसितपक्षजाताः कृष्णेऽश्वयुजस्य वारिदा गर्भाः।**

**चैत्रासितसम्भूताः कार्त्तिकशुक्लेऽभिवर्षन्ति।।१२।।**

चैत्रसितपक्षजाताश्चैत्रशुक्लपक्षसम्भूता ये गर्भास्तेऽश्वयुजस्य कृष्णपक्षे वारिदा वृष्टिदाः। चैत्रा-सितमुद्भूताश्चैत्रकृष्णोद्भवाः कार्तिकशुक्लपक्षेऽभिवर्षन्ति। तथा च गर्गः- **बृ.सं,पृ-३३०**

अथ मेघानां वायोश्च लक्षणमाह-

**पूर्वोद्भूताः पश्चादपरोत्थाः प्राग्भवन्ति जीमूताः।**
**शेषास्वपि दिक्ष्वेवं विपर्ययो भवति वायोश्च।।१३।।**

जीमूता मेघा गर्भकाले ये पूर्वस्यां दिशि समुद्भूतास्ते प्रसवकाले पश्चात् पश्चिमायां दिशि सम्भवन्ति। ये चापरोत्था गर्भकाले पश्चिमायां दिशि सम्भूतास्ते प्रवर्षणे प्राक्पूर्वस्यां दिशि सम्भवन्ति। शेषास्वन्यास्वपि दिक्ष्वेवमनेन प्रकारेण विपर्ययो विपरीतो भवति। तद्यथा- दक्षिणा उत्तरस्याम्, उत्तरा दक्षिणास्याम्। आग्नेया वायव्याम् , वायव्या आग्नेय्याम्। ऐशानीसम्भूता नैर्ऋत्याम् , नैर्ऋतीसम्भूता ऐशान्यामिति।

वायोरनिलस्य चाप्येवमेव विपर्ययो विपरीतो वाच्यः। यथा मेघानां विग्व्यत्यय उक्तस्तथा वायोरपि वाच्यः। यथा पूर्वोद्भूताः पश्चातथा पूर्वोद्भूतो गर्भकाले वायुः प्रवर्षण काले पश्चिमायां दिशि भवतीत्येवं सर्वत्र योज्यम्। तथा च पराशरः- **बृ.सं,पृ-३३१**

अथ माघेन श्रावणं फाल्गुनेन भाद्रपदं चैत्रेणाश्वयुजं वैशाखेन तु कार्तिकं शुक्लेन कृष्णं कृष्णेन शुक्लं दिवसेन रात्रिं रात्र्या दिवसं गर्भाः प्रवर्षन्ति इति।

अधुना गर्भसम्भवलक्षणान्याह-

**ह्लदिमृदूदक्छिवशकदिग्भवो मारुतो वियद्विमलम्।**
**स्निग्धसितबहुलपरिवेषपरिवृतौ हिममयूखार्कौ।।१४,१५,१६।।**
**गर्भाणां पुष्टिकराः सर्वेषामेव योऽत्र तु विशेषः।**
**स्वर्तुस्वभावजनितो गर्भविवृद्धौ तमभिधास्ये।।१७,१८।।**

गर्भग्रहकाले ईदृशानि लक्षणानि शुभफलानि भवन्ति। तद्यथा- मारुतो वायुर्ह्लादिरा-ह्लादकः मृदुः सुखस्पर्शः। उदगुत्तराः। शिवदिगैशानी। शक्रदिक् पूर्वा। असामन्यतमः सम्भूतः। तथा वियदाकाशं विमलं निर्मलम्। हिममयूखश्चन्द्रः। अर्क आदित्यः। तौ स्निग्धेनारूक्षेण सितेन शुक्लह्यग बहुलेन घनेन परिवेषेण परिवृतौ व्याप्तौ।

गर्भाणामिति। एवमनेन प्रकारेण ये गुणा उक्तास्ते सर्वेषामेव गर्भाणां पुष्टिकराः। एते च मार्गशिरः सितपक्षप्रतिपत्प्रभृति वैशाखान्तं यावल्लक्षणीयाः। अत्रास्मिन् गर्भलक्षणे योऽन्यो

विशेषः स्वर्तुस्व-भावजनितः। स्वेनात्मीयेन ऋतुस्वभावेन जनित उत्पादितस्तं गर्भविवृद्धयै गर्भाणां विवृद्धये विशेषमभिधास्ये कथयिष्ये। तथा च पराशरः- **बृ.सं,पृ-३३२**

अथ गर्भसंस्थासु माघादिषु चतुर्षु मासेषु या शुचौ धारणा। नभो नभस्यौ प्रावृट् तस्या अनु वर्षा येषु प्रसवन्ति। तत्र चापाभ्रविद्युत्स्नयित्नुवर्षाणि गर्भास्तांल्लक्षयेत् प्रशस्तानप्रशस्तांश्च। प्रशस्ताभाश्च यस्मिन् काले सूर्येन्दुनक्षत्राश्रयाणां वर्षालिङ्गानां प्रादुर्भावः। पञ्चरूपतां गर्भाणां धारणा मासेन शुद्धिः इति।

अधुना तल्लक्षणमाह-

**पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदाः सपरिवेषाः।**

**नात्यर्थ मृगशीर्षे शीतं पौषेऽतिहिमपातः।।१९,२०।।**

**पवनघनवृष्टियुक्ताश्चैत्रे गर्भाः शुभाः सपरिवेषाः ।**

**घनपवनसलिलाचिद्युत्स्तनितैश्च हिताप वैशाखे।।२१,२२।।**

फाल्गुनमासे पवनो वायू रूक्षः परुषः। चण्डोऽतिवेगः। अभ्राणां मेघानां सम्प्लवा उद्गमाः। स्निग्धाः सूर्याचन्द्रमसोः परिवेषाः। असकला अखण्डाः। रविरादित्यः कपिलः कपिलवर्णस्ताम्रस्ताम्रवर्णश्च शुभः प्रशस्तः।

चैत्रे मासि गर्भाः पवनेन वायुना घनैर्मेघैर्वृष्टया वर्षणे च युक्ताः सपरिवेषाः परिवेषसहिताः शुभाः। वैशाखे मासि घनैर्मेघैः। पवनेन वायुना। सलिलेन जलेन। विद्युता तडिता। स्तनितेन गर्जितेन च युक्ता गर्भा हिताय भवन्ति। तथा च कश्यपः- **बृ.सं,पृ-३३३**

अथ गर्भकाले मेघानां लक्षणमाह-

**मुक्तारजतनिकाशास्तमालनीलोत्पलाञ्जनाभासः।**

**जलचरसत्त्वाकार गर्भेषु घनाः प्रभूतजलाः।।२३।।**

**तीव्रदिवाकरकिरणाभितापिता मन्दमारुता जलदाः।**

**रुषिता इव धाराभिर्विसृजन्त्यम्भः प्रसवकाले।।२४।।**

तीव्रदिवाकरकिरणाभितापिता इति। ये मेघास्तीव्रैः प्रचण्डैर्दिवाकरकिरणैरर्कर-श्मिभिरभि-तापिता दग्धदेहाः। मन्दमारुताः स्वल्पपवना जलदा मेघाः। एवंविधा ये गर्भकाले दृश्यन्ते ते प्रसवकाले पञ्चनवते दिवसशते काले अम्भः पानीयं रुषित रुष्टाः क्रुद्धा इव धाराभिर्विसृजन्त्युत्सृजन्ति। अतिवृष्टिदा भवन्तीत्यर्थः। समाससंहितायाम् - **बृ.सं,पृ-३३४**

अधुना गर्भोपघातलक्षणमाह-

**रुधिरादिवृष्टिवैकृतपरिधेन्द्रधनूंषि दर्शनं राहोः।**

**इत्युत्पातैरेभिस्त्रिविधैश्चान्यैर्हतो गर्भः।।२५,२६।।**

इमानि वक्ष्यमाणानि गर्भाणामुपघातलिङ्गानि विनाशचिह्नानि। एतगैर्भो वृतो विनश्यति। तद्यथा- उल्कापातः। अशनिर्विद्युत्। पांशुपातः पांशुवर्षणम्। दिग्दाहो दिशां दाहः। क्षितिकम्पो भूचलनम्। खपुरं गन्धर्वनगरम् कीलकस्तामसकीलकः। केतुः शिखी। ग्रहयुद्धम्। निर्घातो निर्घातशब्दः।

तथा वृष्टौ वर्षणे। रुधिरादिवैकृतं विकारः। रक्तमांसवसाघृततैलादिवर्षणम्। परिध-लक्षणं वक्ष्यति। परिध इति मेघरेखा या तिर्यग्भास्करोदयेऽस्ते वा इति। तस्य परिघस्येन्द्र-धनुषः सुरचास्य दर्शनम्। राहोर्दर्शनं चन्द्रार्कग्रहणदर्शनम्। इत्येवं प्रकारैरुत्पातैरन्यैस्त्रिविधौर्दि-व्यान्तरिक्षभौमेरुत्पातैर्गभो हतो नष्टो वाच्यः। एतदुक्तं भवति – भर्गे दृष्टे यदि पश्चादुक्ता-नामुत्पातानामन्यतमो भवति तदा गर्भो हतो यस्य समनन्तरं पश्चादुत्पातसम्भवो नान्य इति। तथा च गर्गः- **बृ.सं.पृ-३३५**

तेषां ग्रहाणामुदयास्तमयोल्कानिर्घाताशनिपातगन्धर्वनगरदिग्दाहार्क-रश्मिवर्णविकार-भूचलनप्रादु-र्भावो वर्षास्ववर्षाय इति।

पुनरपि विशेषमाह-

**स्वर्तुस्वभावजनितैः सामान्यैर्यैश्च लक्षणैर्वृद्धिः।**

**गर्भाणां विपरीतैस्तैरेव विपर्ययो भवति।।२७।।**

**भाद्रपदाद्वयविश्वाम्बुदैवपैतामहेष्वथर्क्षेषु।**

**सर्वेष्वृतुष विद्युद् गर्भो बहुतोयदो भवति।।२८।।**

भद्रपदाद्वयं पूर्वभद्रपदोत्तरभद्रपदे। विश्वेदेव उत्तराषाढा। अम्बुदेवः पूर्वाषाढा। पैतामहो रोहिणी। एतेषु पञ्चसु नक्षत्रेषु सर्वेष्वप्यृतुषु वृद्धो गर्भःपौषे समार्गशीषे सन्ध्यारागोऽम्बुदाः इत्यादिभिर्गुणौः पुष्टः प्रवर्षणे बहुतोयदः प्रभूतवर्षदो भवति।

साम्प्रतं येषु नक्षत्रेषु भर्गः सम्भूतो बहून्यहानि वर्षति तान्याह-

**शतभिषगाश्लेषार्द्रास्वातिमघासंयुतः शुभो गर्भः।**

**पुष्णाति बहून्दिवसान् हन्त्युत्पातैर्हतास्त्रिविधैः।।२९।।**

**मृगमांसादिष्वष्टौ षट् षोडश विंशतिश्चतुर्युक्ता।**

**विंशतिरथ दिवसत्रयमेकतमर्क्षेण पञ्चभ्यः।।३०।।**

सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवतीति। तेन पञ्चनिमित्तसंयुक्तो गर्भफ पुष्टो बहुतोयदो भवति। गर्भाणां पुष्टिनिमित्तान्यभिधाननिमित्तानि च प्राक्प्रदर्शितानि। विशेषनिमित्तैर्युक्तो गर्भो बहुतोयदो भवति।

तान्याह-

**पञ्चनिमित्तैः शतयोजनं तदर्द्धार्द्धमेकहान्याऽतः।**

**वर्षति पञ्चनिमिताद् रूपेणैकेन यो गर्भः।।३१।।**

**द्रोणः पञ्चनिमित्ते गर्भे त्रीण्याढकानि पवनेन।**

**षड् विद्युता नवाभ्रैः स्तनितेन द्वादश प्रसवे।।३२।।**

द्रोणः पञ्चनिमितैः पञ्चनिमित्तसंयुक्ते गर्भ द्रोणः प्रवर्षति। षड् विद्युता। आढकानीत्यनुवर्तते। विद्युता संयुक्ते गर्भे आढकानि षड् वर्षति। नवाभ्रैर्मेधैः संयुक्ते गर्भे नवाढकानि वर्षति। स्तनितेन द्वादश प्रसवे। स्तनितेन गर्जितेन द्वादशाढकानि प्रसवकाले वर्षति। प्रसवकालेऽभिहित एव पञ्चनवते दिनशते तत्रैव प्रसवमायाति। अमुमेवार्थं वृद्धगर्ग आह-

**बृ.सं,पृ-३३८**

अत्रैव विशेषमाह-

**क्रूरग्रहसंयुक्ते करकाशनिमत्स्यवर्षदा गर्भाः।**

**शशिनि रवौ वा शुभसंयुतेक्षिते भूरिवृष्टिकराः।।३३।।**

गर्भनक्षत्रे क्रूरग्रहसंयुक्ते पापग्रहाधिष्ठिते गर्भाः करकाशनिमत्स्यवर्षदाः। करका उपलवृष्टिः, अशनिर्विद्युत्, मत्स्या मीनास्तैः, संयुक्तं वर्ष ददाति। शशिनि चन्द्रे रवावादित्ये वा तत्र स्थिते तस्मिंश्च शुभग्रहैर्बुधजीवशुक्राणामन्यतमेन संयुक्ते ईक्षिते दृष्टे च। संयुतश्चासौ ईक्षितश्च तस्मिंस्तथाभूते भूरि-वृष्टिकरा बहुवर्षदा गर्भाः।।

अथ गर्भसम्भवे सति विशेषलक्षणमाह-

**गर्भसमयेऽतिवृष्टिर्गर्भाभावाय निर्निमित्तकृता।**

**द्रोणाष्टांशेऽभ्यधिके वृष्टे गर्भः स्रुतो भवति।।३४।।**

गर्भसमये गर्भग्रहणकाले निर्मिमित्तकृता अतिवृष्टिः। निमित्तं कारणं यथा -

एवं निमित्तरहिता अतिवृष्टिर्गर्भाभावाय गर्भविनाशाय भवति। द्रोणः पलशतद्वयं तस्याष्टांशः पलानां पञ्चविंशतिः। तदधिके वृष्टे गर्भः स्त्रुतः परिस्त्रुतो भवति। न जलप्रद इत्यर्थः।।

अत्रैव विशेषमाह-

**गर्भः पुष्टः प्रसवे ग्रहोपघातादिभिर्यदि नवृष्टः।**

**आत्मीयगर्भसमये करकामिश्रं ददात्यम्भः।।३५।।**

यो गर्भो ग्रहणकाले पुष्टः प्रसवे प्रसवकाले पञ्चनवते दिनशते ग्रहोपघातादिभिरुत्पातैः। ग्रहोपघातः कश्चिद्ग्रहस्तत्कालमेव जलप्रदो भवति। यथा भौमः प्राजापत्ये श्रवण इति। आदिग्रह-णाद्दिव्यान्तरिक्ष-भौमेरुत्पातैर्यदि न वृष्टः स चात्मीयगर्भसमये पुनः पुरस्ताद् द्वितीयगर्भ-ग्रहणकाले। अम्भः पानीयं करकामिश्रमुपलसंयुक्तं ददाति।

अत्रैव दृष्टान्तरमाह-

**काठिन्यं याति यथा चिरकालधृतं पयः पयस्विन्याः।**

**कालातीतं तद्वत्सलिलं काठिन्यमुपयाति।।३६।।**

यथा पयस्विन्याः सक्षीराया धेनोः पयः क्षीरं चिरकालधृतं प्रभूतकालमुषितं काठिन्यं कठिनयां याति गच्छति। तद्वतथा कालातीतं सलिलं जलं काठिन्यमुपयाति प्राप्नोति। सलिलं तूपलतां प्रतिपद्यत इति।।

अथ गर्भस्य पुष्टिलक्षणमाह-

**पञ्चनिमित्तैः शतयोजनं तदर्धार्धमेकहान्यातः।**

**वर्षति पञ्च समन्तात्तद्रूपेणैव यो गर्भः।।३७।।**

पवनो वायुः। सलिलं जलम्। विद्युत् तडित्। गर्जितं मेघशब्दः। अभ्राणि मेघाः। एतैः पञ्चभिर्यो गर्भोऽन्वितो युक्तः स बहुतोयो बहुजलप्रदः यतः स गर्भः पञ्चरूपाभ्युपेतः। पञ्चभी रूपैः संयुक्तोऽतो बहुतोयदो भवति। एवंविधो गर्भो गर्भकाले यद्यतिभूरि तोयं प्रभूतपानीयं विसृजतयुत्सृजति , तदा प्रसवसमयं मेघवर्षकालमित्वा प्राप्य पञ्चनवते दिनशतेऽतीते शीकराम्भः करोति जलबिन्दून् ददाति। न प्रभूतं वर्षतीत्यर्थः।

## २. गर्भधारणाध्यायः

तत्रादावेव तासां लक्षणमाह-

**ज्यैष्ठसितेऽष्टम्याद्याश्चत्वारो वायुधारणा दिवसाः।**

**मृदुशभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च।।१।।**

ज्यैष्ठसिते ज्येष्ठशुक्लपक्षे अष्टम्याद्याश्चत्वारो ये दिवसास्ते वायुधारणा दिवसाः। वायुर्धारणा येषाम्, ते दिवसा वायुना धार्यन्ते यथा तेषां प्रसवो न भवति। ते च दिवसा मृदुशुभपवनाः शस्ताः। मृदुः सुखसंस्पर्शः। शुभ उदक्शिवशक्रादिसम्भवः। पवनो वायुः। तथा स्निग्धधनस्थागितगगनाश्च शस्ता एव। स्निग्धैररूक्षैः, घनैर्मेधैः, स्थगितं छन्नं गगनमाकाशं येषु दिवसेषु।

अथ तास्वेव विशेषमाह-

**तत्रैव स्वात्याद्ये वृष्टे भचतुष्टये क्रमान्मासाः।**

**श्रावणपूर्वा ज्ञेयाः परिस्त्रुता धारणास्ताः स्युः।।२।।**

तत्रैव तस्मिन्नेव ज्यैष्ठसिते स्वात्याद्ये स्वातिपूर्वके भचतुष्टये नक्षत्रचतुष्टये स्वाति-विशाखाऽनुराधाज्येष्ठाख्ये वृष्टे क्रमात् परिपाटया श्रावणपूर्वाश्चत्वारो मासा ज्ञेयाः। श्रावण भाद्रपदाश्व-युजकार्तिकाख्याः। ताश्च धारणाः परिस्त्रुताः स्युर्भवेयुः। न जलप्रदा भवन्ति। एतदुक्तं भवति – स्वातौ वृष्टायां श्रावणे त्ववृष्टिः। विशाखायां भाद्रपदे। अनुराधायामाश्वयुजे। ज्येष्ठायां कार्तिक इति। तथा च काश्यपः- **बृ.सं,पृ-३४१**

पुनरपि विशेषलक्षणमाह-

**यदि ताः स्युरेकरूपाः शुभास्ततः सान्तरास्तु न शिवाय।**

**तस्करभयदाश्चोक्ताः श्लोकाश्चाप्यत्र वासिष्ठाः।।३।।**

ता धारणा यद्येकरुपाश्चतुर्ष्वपि दिवसेषु सदृशाः स्युर्भवेयुस्ततः शुभाः। सान्तराः सविशेषां विसदृशा न शिवाय श्रेयसे भवन्ति। ताश्च तस्करभयदाश्चौरभीतिप्रदाश्चोक्ताः कथिताः। अत्रास्मिन्नर्थेऽप्यमी वासिष्ठाः श्लोकाः वसिष्ठमहर्षिणा उक्ताः कथिता लिख्यन्ते।

अथ तांश्चाह-

**सविद्युतः सपृषतः सपांशूत्करमारुताः।**

**सार्कचन्द्रपरिच्छान्ना धारणाः शुभधारणाः।।४,५,६।।**

**मेघाः स्निग्धाः संहताश्च प्रदक्षिणगतिक्रियाः।**

**तदा स्यान्महती वृष्टि : सर्वसस्याभिवृद्धये।।७, ८।।**

रविचन्द्राभ्यां सूर्यशशिभ्यां परिवेषाः। स्निग्धा अरूक्षा नात्यन्तदूषिता नातिविकृताः तथापि सर्वस्यार्थसाधिका वृष्टिर्विज्ञेया। याय वृष्टया सर्वसस्यानामर्थवृद्धिभवेति। सर्वाणि सस्यानि निष्पद्यन्त इत्यर्थः।

मेघाः स्निग्धा इति। यद्येवंविधा मेघना घना दृश्यन्ते तदा सर्वसस्याभिवृद्धये निःशेष सस्यानामविभर्द्धनाथ महती प्रभूता वृष्टिः स्याद्भवेत्। कीदृशाः मेघाः ? स्निग्धा अरूक्षा, संहता घनाः, प्रदक्षिणगतिक्रिया येषाम्। यथा पूवस्या् स्थिता दक्षिणां व्रजन्ति। दक्षिणस्यां पश्चिमाम्। पश्चिमायामुत्तराम। उत्तरस्यां पूर्वामिति।

## ३. प्रवर्षणाध्यायः

तत्र तावल्लक्षणमाह-

**ज्यैष्ठ्यां समतीतायां पूर्वाषाढादिसम्प्रवृष्टेन।**

**शुभमशुभं वा वाच्यं परिमाणं चाम्भसस्तज्ज्ञैः।।१।।**

ज्येष्ठमासस्येयं पौर्णमासी ज्यैष्ठी, तस्यां समतीतायामतिक्रान्तायां पूर्वाषाढा-दिसम्प्रवृष्टेन पूर्वाषा-ढामादितः कृत्वा सर्वेषु नक्षत्रेषु सम्प्रवृष्टेन प्रवर्षितेन तज्ज्ञैः पण्डितैरम्भसो जलस्य परिमाणं शुभमशुभं वा वाच्यं वक्तव्यम्। वृष्टौ शुभमवृष्टावशुभमिति। तथा च गर्गः- **बृ.सं,पृ-३४४**

ज्येष्ठे मूलमतिक्रम्य मासि प्रतिपदग्रतः।

वर्षासु वृष्टिज्ञानार्थं निमित्तान्युपलक्षयेत्।

अधुना जलप्रमाणार्थमाह-

**हस्तविशालं कुण्डकमधिकृत्याम्बुप्रमाणनिर्देशः।**

**पञ्चाशत्पलमाढकमनेन मिनुयाज्जलं पतितम्।।२।।**

हस्तविशालं हस्तविस्तीर्णं कुण्डकं समपरिवर्तुलमधिकृत्य कृत्वा अम्बुप्रमाणनिर्देशो जलप्रमाणकथनं कार्यम्। पञ्चाशत्पलमाढकमनेन प्रमाणेन पतितं जलं पानीयं मिनुयान्मापयेत्। एतदुक्तं भवति-हस्तविशालं कृण्डकं वर्षति देवे संस्थाप्य तत्र यज्जलं पतितं तन्मापयेत्। तद्यदि पलशतद्वयं भवति तदा द्रोणो वृष्टः। यत उक्तम्- पञ्चाशत्पलमाढकं चतुर्भि-राढकैर्द्रोणः इति। तथा च समाससंहितायाम् – **बृ.सं,पृ-३४४**

तत्र वर्षप्रमाणमाह-

**येन धरित्री मुद्रा जनिता वा बिन्दवस्तृणाग्रेषु।**

**वृष्टेन तेन वाच्यं परिमाणं वारिणः प्रथमम्।।३।।**

**केचिद्यथाभिवृष्टं दशयोजनमण्डलं वदन्त्यन्ये।**

**गर्गवसिष्टपराशरमतमेतद् द्वादशान्न परम्।।४।।**

केचिन्मुनयः कश्यपप्रभृतयो यथाभिवृष्टं यावतावन्मात्रं वृष्टं कथयन्ति। प्रवर्षणकाले यथा तथैकस्मिन्नपि प्रदेशे वृष्टे वर्षाकाले शोभनं वर्ष पूर्वाषाढादि ग्राह्यम। तथा च कश्यपः- **बृ.सं,पृ-३४५**

अन्ये देवलादयो दशयोजनमण्डलं वृष्टं वदन्ति। प्रवर्षकाले योजनदशके वृष्टे वर्षाकाले अम्बुकथनं नास्मादून इति। तथा च देवलः-

गर्गवसिष्ठपराशराणामेतन्मतं यथा द्वादशाद्योजनात् परम्। प्रवर्षकाले योजनद्वादशके वृष्टे वर्षाकाले अम्बुकथनं कार्यं नास्मादून इति। तथा च गर्गः- **बृ.सं,पृ-३४५**

पुनरपि विशेषमाह-

**येषु च भेष्वभिवृष्टं भूयस्तेष्वेव वर्षति प्रायः।**

**यदि नाप्यादिषु वृष्टं सर्वेषु तदा त्वनावृष्टिः।।५।।**

येषु च पूर्वाषाढादिषु भेषु नक्षत्रेष्वभिवृष्टं प्रवर्षकाले भूयः पुनस्तेष्वेव नक्षत्रेषु प्रायो बाहुल्येन वर्षति। प्रसवकाले आप्यादिषु पूर्वाषाढादिषु सप्तविशेष्वपि नक्षत्रेषु यदि न प्रवृष्टं तदा त्वनावृष्टिः प्रसवकाले भवतीति।

अधुना नक्षत्राणां वृष्टिप्रमाणमाह-

**हस्ताप्यसौम्यचित्रापौष्णधनिष्ठासु षोडश द्रोणाः।**

**शतभिषगैन्द्रस्वातिषु चत्वारः कृत्तिकासु दश।।६,७ ।**

**पञ्चदशाजे पुष्ये च कीर्तिता वाजिभे दश द्वौ च।**

**रौद्रेऽष्टादश कथिता द्रोणा निरुपद्रवेष्वेते।।८,९।।**

हस्तः, आप्यं पूर्वाषाढा, सौम्यं मृगशिराः , चित्रा, पौष्णं रेवती, धनिष्ठा- एतेष्वेकतमे प्रवर्षकाले यदि वर्षति तदा प्रसवकाले षोडश द्रोणा वर्षन्ति। एवं शतभिषक्, ऐन्द्रं ज्येष्ठा, स्वातिः- एतेषु चत्वारो द्रोणा वर्षन्ति। कृत्तिकासु दश द्रोणाः।

श्रवणे, मघा, अनुराधा, भरणी, मूलम-एतेषु दश चतुर्युक्ताश्चतुर्दश द्रोणाः। फल्गुन्यां पूर्वफल्गुन्यां पञ्चकृतिः, पञ्चविशंतिद्रोणाः। पुनर्वसौ विंशतिर्द्रोणाः। ऐन्द्राग्न्याख्ये विशाखायाम, वैश्वे उत्तराषाढायाम् विंशतिर्द्रोणाः। सार्पभे आश्लेषायां दश त्र्यधिकास्त्रयोदश द्रोणाः। कृतिः पञ्चविंशतिर्द्रोणाः। अजे पूर्वभद्रपदायाम्, पुष्ये च पञ्चदश द्रोणाः कीर्तिता उक्ताः। वाजिभे अश्विन्याम्, दश द्वौ च द्वादश द्रोणाः। रौष्द्रे आर्द्रायाम, अष्टादश द्रोणाः कथिता उक्ताः। एते प्रवर्षणकाले द्रोणा नक्षत्रेषूक्तास्उते निरुपद्रवेषू-पद्रवरहितेषु वाच्या। इति। तथा च समाससंहितायाम् - **बृ.सं,पृ-३४७**

अत्रैव विशेषमाह-

**रविरविसुतकेतुपीडिते क्षितितनयत्रिविधाद्भुताहते च।**

**भवति च न शिवं न चापि वृष्टिः शुभसहित निरुपद्रवे शिवं च॥१०॥**

रविरादित्यः। रविसुतः सौरः। केतुः शिखी। एतेषामन्यतमे भे नक्षत्रे उपहते तत्र स्थित इत्यर्थः। तथा क्षितितनयेनाङ्गारकेणाहतेऽभिघातिते। वक्रातिवक्रमध्यगमनयोगतारकभेदा-नामन्यतमेन। तथा त्रिविधेनाद्भुतेनोत्पातेन दिव्यान्तरिक्षभौमेन चाहते न शिवं श्रेयो न चापि वृष्टिर्भवति। शुभसहित बुधजीवशुक्राणामन्यतमने संयुक्ते। निरुपद्रवे अन्योत्पापरहिते प्रवर्षणं शिवं श्रेयश्च भवति। गर्गः- **बृ.सं,पृ-३४७**

## ४. रोहिणीयोगाध्यायः

तत्रादावेवाऽऽगमप्रदर्शनार्थमाह-

**कनकशिलाचयविवरजतरुकुसुमासङ्गिमधुकरानुरुते।**

**बहुविहगकलहसुरयुवतिगीतमन्द्रस्वनोपवने।।१।।**

**तानवलोक्य यथावत् प्राजापत्येन्दुसम्प्रयोगार्थान्।**

**अल्पग्रन्थेनाहं तानेवाभ्युद्यतो वक्तुम्।।२, ३।।**

यान् प्राजापत्येन्दुसम्प्रयोगार्थान्। प्राजापत्यं रोहिणी तस्या इन्दुना चन्द्रेण सह सम्प्रयोगः समागमस्तत्र यानर्थान्। शुभाशुभान् बृहस्पतिः सुरगुरुर्नारदायाह। नारदो नाम मुनिस्तस्मै प्रोक्तवान्। कस्मिन् स्थाने ? सुरनिलयशिखरिशिखरे, सुरनिलयशिखरी मेरुः, सुरा देवास्तेषां निलयः स्थानम, सुरनिलयश्चासौ शिखरी पर्वतस्तस्य शिखरे पृष्ठे यदुपवनमुद्यानं तस्मिन्। कीदृशे उपवने ? कनकशिलाः सुवर्णपाषाणास्तासां क्षयः सञ्चयस्तत्र यानि विवराणि छिद्राणि तेषु से जातास्तरवो वृक्षास्तेषु यानि कुसुमानि पुष्पाणि तेषु च मधुकराणां भ्रमराणां य आसङ्ग आसिक्तः संश्लेषस्तेनानुरुतं शब्दो यस्मिन्नुपवने, तथा बहवो विद्याधर्यस्तासां च गायमानानां गति योऽसौ मन्द्रो मधुरः स्वनः शब्दः स योगानाहोक्तवान्, तान् सर्वानेवावलोक्य विचार्य यथावत्संस्फुटमल्पग्रनन्थेमाहं तानेव प्राजापत्येन्दु-सम्प्रयोगार्थान् वक्तुं गदितुमभ्युद्यतो-ऽस्मिति।

अथ स रोहिणीयोगः कस्मिन् काले विचार्य इत्येतदाह-

**प्राजेशमाषाढतमिस्त्रपक्षे क्षमाकरेणोपगतं समीक्ष्य।**

**वक्तव्यमिष्टं जगतोऽशुभं वा शास्त्रोपदेशाद् ग्रहचिन्तकेन।।४।।**

**योगो यथानागत एव वाच्यः स धिष्ण्ययोगः करणे मयोक्तः।**

**चन्द्रप्रमाणद्युतिवर्णमार्गैरुत्पातवातैश्च फलं निगद्यम्।।५।।**

आषाढमासस्य तमिस्त्रपक्षे कृष्णपक्षे प्राजेशं रोहिणीं क्षपाकरेण चन्द्रेणोपगतं संयुक्तं समीक्ष्य दृष्ट्वा ग्रहचिन्तकेन दैवज्ञेन शास्त्रोपदेशाद् ग्रन्थागमाज्जगतो जनस्येष्टं शुभमशुभमनिष्टं वा वक्तव्यं कथनीयम्।

योगो यथेति। यथा येन प्रकारेण योगो रोहिणीयोगोऽनागतो भावी एव वाच्यो वक्तव्योऽत्र स धिष्ण्ययोगो नक्षत्रयोगः करणे पञ्चसिद्धान्तिकायां मयोक्तः कथितः। तथा च पञ्चसिद्धान्ति-कायाम् – **बृ.सं,पृ-३४९**

चन्द्रप्रमाणेति। चन्द्रस्य प्रमाणेन बिम्बपरिमाणेन। द्युत्या कान्त्या। वर्णेन सितादि-केन। मार्गेण यथा पूर्वाद्यास्वष्टासु दिक्षु संस्थित्या। एतैस्तथोत्पातैस्तत्कालजातैरुल्का-पातादिभिर्वातैश्चानिलैः। शुभाशुभफलं निगद्यं वक्तव्यमिति।।

अथ तत्र विधानमाह-

**पुरादुदग्यत्पुरतोऽपि वा स्थलं त्र्यहोषितस्तत्र हुताशतत्परः।**

**ग्रहान् सनक्षत्रगणान् समालिखेत्सधूपपुष्पैर्बलिभिश्च पूजयेत्।।६।।**

**सरत्नतोयौषधिभिश्चतुर्दिशं तरुप्रवालापिहितैः सुपूजितैः।**

**अकालमूलैर्कलशैरलंकृतं कुशास्तृतं स्थण्डिलमावसेद् द्विजः।।७।।**

पुरान्नगरादुदगुत्तरस्यां दिशि यत्स्थलं तत्र तस्मिन् स्थले द्विजो ब्राह्मणः , त्र्यहोषितो दिनत्रयं स्थितस्तत्र च कृतोपवासो हुताशतत्परः, अग्निहवनपरः। तथा च गर्गः- **बृ.सं,पृ-३४९**

**आलभ्य मन्त्रेण महाव्रतेन बीजानि सर्वाणि निधाय कुम्भे।**

**प्लाव्यानि चामीकरदर्भतोयैर्होमो मरुद्वारुणसोममंन्त्रैः।।८।।**

ततः सर्वाणि बीजानि महाव्रतेन महाव्रतनाम्ना मन्त्रेणाऽऽलभ्याभिमन्त्र्य कुम्भे निधाय विनिक्षिप्य प्लाव्यानि मज्जनीयानि। कैः? तोयैर्जलैः। कीदृशैः ? चामीकरं सुवर्णं दर्भाः कुशाश्च विद्यन्ते येषु तैस्तोयैः। तथा होमोऽग्निहोमो मरुद्वारुणसोममन्त्रैः मरुद्वायुः, वरुणो यादसां पतिः, सोमश्चन्द्रः, एषां मन्त्रैर्होमः कार्यः। केषाञ्चित पाठे होमश्चरुर्वारुणसौम्यमन्त्रैः। चरुः स्थालीपाको वारुणसौम्यमन्त्रैर्होमो होतव्य इति।।

ततः किं कुर्यादित्याह-

**श्लक्ष्णां पताकामसितां विदध्याद्दण्डप्रमाणां त्रिगुणोच्छ्रिताञ्च।**

**आदौ कृते दिग्ग्रहणे नभस्वान् ग्राह्यस्तया योगगते शशाङ्के।।९।।**

श्लक्ष्णां सूक्ष्मतन्तुकृमां पताकां वैजयन्तीमसितां कृष्णवर्णा विदध्यादुच्छ्रयेत्। तां च दण्डप्रमाणां चतुर्हस्तसम्मितााम्। चतुर्हस्तो दण्डः। तथा च पुराणे- **बृ.सं,पृ-३५१**

................................ चतुर्हस्तो धनुः स्मृतः।

**तत्रार्द्धमासाः प्रहरैर्विकल्प्या वर्षानिमित्तं दिवसास्तवंशै।**

**सव्येन गच्छन् शुभदः सदैव यस्मिन् प्रतिष्ठा बलवान्स वायुः।।१०।।**

तत्र तस्मिन् रोहिणीयोगे प्रहरैहोरात्राष्टभागैरर्द्धमासाः पक्षा विकल्प्या विकल्प्यानीयाः। किमर्थम्? वर्षानिमित्तं वर्षासमयज्ञानार्थम्। एतदुक्तं भवति - यस्मिन्नहोरात्रे रोहिण्या सह चन्द्रमा युज्यते तत्र सूर्योदयात्प्रभृति प्रथमं प्रहरं यावच्छोभनो वातो वहति तदा श्रावणस्य प्रथमपक्षे देवो वर्षति। अशुभेन वातेनावृष्टिस्तत्र वक्तव्या। एवं द्वितीयप्रहरे शोभनो वातो वहति तदा श्रावणस्य द्वितीयपक्षे देवो वर्षति। तृतीये भाद्रपदस्य प्रथमपक्षे वर्षति। चतुर्थे भाद्रपदस्य द्वितीयपक्षे वर्षति। तथा रात्रौ प्रथमप्रहरे शोभनवाते आश्वयुजः प्रथमपक्षे वर्षति, द्वितीयप्रहरे द्वितीयपक्षे। तृतीयप्रहरे कार्तिकप्रथमपक्षे चतुर्थे द्वितीयपक्षे वर्षति। अशुभे वातेऽनावृष्टिः,। एव यथासम्भवं योज्यम्।

यस्मिन् प्रतिष्ठेति। यस्मिन् वायौ प्रतिष्ठा स्थैर्यमाधिक्यं भवति स एवं बलवांस्तेन शुभाशुभं वदेत्। केचिदेवं व्याचक्षते- आदित्यास्तमये यो वायुः सा प्रतिष्ठेत्येतन्न शोभनम्। तथा च ऋषिपुत्रः- **बृ.सं,पृ-३५३**

अन्यच्छुभाशुभमाह-

**वृत्ते तु योगेऽङ्कुरितानि यानि सन्तीह बीजानि धृतानि कुम्भे।**

**येषां तु योंऽशोऽङ्कुरिस्तदंशस्तेषां विवृद्धिं समुपैति नान्यः।।११।।**

रोहिण्या सह शशिनो योगे वृत्ते यानि बीजानि कुम्भे निहितानि प्राक्स्थापितानि तेषां यान्यङ्कुरितानि तान्येवास्मिन् वर्षे सन्ति भवन्ति। हि यस्मादर्थे। येषामपि कुम्भस्थितानां योऽशो भागोऽङ्कुरितस्त-दंशस्तद्भागस्तेषामेव वृद्धिं समुपैति प्राप्नोति नान्य इति।

अथ रोहिणीयोगे यद्यच्छस्यते ततदाह-

**शान्तपक्षिमृगराविता दिशो निर्मलं वियदनिन्दितोऽनिलः।**

**शस्यते शशिनि रोहिणीगते मेघमारुतफलानि वच्म्यतः।।१२।।**

शशिनि चन्द्रे रोहिणीगते रोहिणीयोगं गतं इदमिदं शस्यते स्तूयते शान्तैरनर्काभिमुखै-र्मधुरस्वनैश्च पक्षिभिर्विहगैर्मृगैश्चारण्यपशुभिर्दिश आशा राविताः शब्दं कारिताः। वियदाकाशं निर्मलं विमलम्। वायुरनिन्दितोऽकुत्सितः। तथा च गर्गः- **बृ.सं,पृ-३५४**

मेघमारुतफलानि वच्म्यत इति। अतोऽस्मादनन्तरं मेघानामभ्रमाणां मारुतस्य च वायोः फलानि वच्मि कथयामि।

अधुना तान्येवाह-

**क्वचिदसितसितैः सितैः क्वचिच्च क्वचिदसितैर्भुजगैरिवाम्बुवाहैः।**

**वलितजठरपृष्ठमात्रदृश्यैः स्फुरिततडिद्रसनैर्वृतं विशालैः।।१२।।**

**विकसितकमलोदरावदातैररुणकरद्युतिरञ्जितोपकण्ठैः।**

**छुरितमिव वियद्घनैर्विचित्रैर्मधुकरकुङ्कुमकिंशुकावदातैः।।१३।।**

**असितघननिरुद्धमेव वा चलिततडित्सुरचापचिन्हितम्।**

**द्विपमहिषकुलाकुलीकृतं वनमिव दावपरीतमम्बरम्।।१५।।**

अथवाऽम्बरमाकाशं वनमरण्यमिव दावपरीतम् दावो दावाग्निस्तेन परीतं व्याप्तमिव। यतोऽसितैः, कृष्णैर्घनैर्मेघैर्निरुद्धं स्थगितम्, तथा चलिताभिस्तडिद्भिः स्फुरद्विद्यूद्भिः सुरचापेनेन्द्र-धनुषा विचित्रितं नानावर्णतामुपगतम्। कीदृशम्? उत्प्रेक्ष्यते - द्विपमहिषकुलाकुलीकृतं वनमिव, मेघानां तस्तादृश्यं द्विपकुलैर्हस्तिसममूहैर्महिषकुलैश्चाकुलीकृतं सोद्यमं तैः संयुक्तमतो दावपरीतं वनमिवोत्प्रेक्ष्यते।।१५।।

अन्यदप्याह-

**अथवाञ्जनशैलशिलानिचयप्रतिरूपधरैः स्थगितं गगनम्।**

**हिममौक्तिकशङ्खकरद्युतिहारिभिरम्बुधरैरथवा।।१६।।**

अथवाञ्जनशैलस्याञ्जनपर्वतस्य शिलानां पाषाणानां यो निचयः समूहस्तत्प्रति-रूपधरैस्तादृशैरम्बुधरैर्मेघैः स्थगितमाच्छादितं गगनमाकाशम्, कृष्णैरित्यर्थः। अथवा हिमस्य तुषारस्य मौक्तिकस्य मुक्ताफलानां शङ्खस्य कम्बुनः। शशाङ्ककराणां चन्द्ररश्मीनां द्युतिहारिभिः कान्तिं चोरयद्भिरम्बुधरैर्मेघैः श्वैतवर्णैः स्थगितमाकाशमित्यर्थः।

अन्यच्च-

**तडिद्धैमकक्ष्यैर्बलाकाग्रदन्तैः स्त्रवद्वारिदानैश्चलत्प्रान्तहस्तैः।**

**विचित्रेन्द्रचापध्वजोच्छ्रायशोभैस्तमालालिनीलैर्वृतं चाब्दनागैः।।१७।।**

**सन्ध्यानुरक्ते नभसि स्थितनामिळन्दीवरश्यामरुचां घनानाम्।**

**वृन्दानि पीताम्बरवेष्टितस्य कान्तिं हरेश्चोरयतां यदा वा।।१८।।**

घनानां मेघानां नभस्याकाशे सन्ध्यानुरक्ते सन्ध्यारागरञ्जिते लोहिते स्थितानो सन्तिष्ठ-ताम्। कीदृशानाम्? इन्दीवरश्यामरुचाम् इन्दीवरं नीलोत्पलं तद्वत् श्यामा रुक् कान्तिर्येषां तथाभूतानाम्। वृन्दानि समूहाः। अत एवोत्प्रेक्ष्यते - हरेर्भगवतो नारायणस्य पीताम्बर-वेष्टितस्य पीतवस्त्रप्रावृतशरीरस्य कान्तिं दीप्तिं चोरयतां मुष्णतां यदा यस्मिन्नभसि।

अन्यमेघवर्णनमाह-

**सशिखिचातकदर्दुरनिस्वनैर्यदि विमिश्रितमन्द्रपटुस्वनाः।**

**खमवतत्य दिगन्तविलम्बिनः सलिलदाः सलिलौघमुचः क्षितौ।।१९।।**

**निगदितरूपैर्जलधरजालैस्त्र्यहमवरुद्धं द्वयहमथवाहः।**

**यदि वियदेवं भवति सुभिक्षं मुदितजना च प्रचुरजला भूः।।२०।।**

यदि वियदाकाशं निगदितरूपैः कथितरूपैर्जलधराणां मेघानां जालैर्वृन्दैस्त्र्यहं दिनत्रयमवरुद्धं स्थगितम्। द्वयहं दिनद्वयै वाऽहर्दिनमेकम्। अनेन प्रकारेण सुभिक्षं भवति। तथा भूरवनिर्मुदितजना प्रहृष्टलोका प्रचुरजला भूरिति या च भवति। तथा च गर्गः- **बृ.सं,पृ-३५७**

तथा च पराशरः रोहिणीयोगे पुनः प्रदक्षिणो मृदुर्मारुतः स्नेहवन्ति चाभ्राणि विद्युच्छ-क्रचापालंकृतानि स्वादुसुरभिविमलशिशिरतावृद्धिश्चाम्भसां वृष्टिक्षेमसुभिक्षाय। यावतो दिवसान् निमित्तप्रादुर्भावानुबन्धस्तावद्वर्षाणि सुभिक्षक्षेमम्। आसप्तरात्राद्बिलवासिनां बिलेभ्यो निष्क्रमणं स्त्रीपुरुषबालानां प्रमोदः पक्षिणां क्षीरपुष्पफलवृक्षसेवनं तरूणामच्छिद्रपत्रता पुरपौरहिताय इति। तथा च समाससंहितायाम्- **बृ.सं,पृ-३५७**

अथाशुभानां मेघानां लक्षणमाह-

**रूक्षैरल्पैर्मारुताक्षिप्तदेहैरुष्ट्रध्वाङ्क्षप्रेतशाखामृगाभैः।**

**अन्येषां वा निन्दितानां स्वरूपैर्मूकैश्चाब्दैर्नो शिवं नापि वृष्टि ः।।२१।।**

एवंविधैरब्दैर्मेघैर्नो शिवं श्रेयः, न चापि वृष्टिर्वर्षणं भवति। कीदृशैः ? रूक्षैरस्निग्धैः। अल्पैर्लधुभिः। मारुतेन वायुना आसमन्तात्क्षिप्ताः प्रेरिता देहाः, शरीराणि येषां तैः। उष्ट्रः करभः। ध्वाङ्क्षः काकः। प्रेतः शवः। शाखामृगो मर्कटः। एतेषां सदृशी आभा सादृश्य माकृत्या च येषां तैस्तथाभूतैः। अन्येषामपरेषां वा प्राणिनां निन्दितानां कुत्सितानां श्वमार्जारराक्षसानां स्वरूपैः सदृशैर्मूकैर्निः शब्दैश्च। तथा च गर्गः- **बृ.सं,पृ-३५७**

अन्यच्छुभलक्षणमाह-

**विगतघने वा वियति विवस्वानमृदुमयूखः सलिलकृदेवम्।**

**सर इव फुल्लं निशि कुमुदाढयं खमुडुविशुद्धं यदि च सुवृष्ट्यै।।२२।।**

अथ विवस्वानादित्यो वियत्याकाशे विगतधने मेघरहिते अमृदुमयूखश्चण्ड-रश्मिर्भवति तदैवमनेन प्रकारेण सलिलकृज्जलं करोति। तथा खमाकाशं निशि रात्रावृडुविशुद्धं

निर्मलनक्षत्रं कुमुदाढयं कुमुदबहुल् सर इव फुल्लं विकसितं यदि दृश्यते तदा सुवृष्टयै शोभन-वृष्टये भवति।।

अथ दिग्भागेन मेघफलान्याह-

**पूर्वोद्भूतैः सस्यनिष्पत्तिरब्दैराग्नेयाशासम्भवैरग्निकोपः।**

**याम्ये सस्यं क्षीयते नैर्ऋतेऽर्द्धं पश्चाज्जातैः शोभना वृष्टिरब्दैः।।२३।।**

**वायव्योत्थैर्वातवृष्टिः क्वचिच्च पुष्टा वृष्टिः सौम्यकाष्ठासमुत्थैः।**

**श्रेष्ठं सस्यं स्थणुदिक्सम्प्रवृद्धैर्वायुश्चैवं दिक्षु धत्ते फलानि।।२४।।**

**उल्कानिपातास्तडितोऽशनिश्च दिग्दाहनिर्घातमहीप्रकम्पाः।**

**नादा मृगाणां सपतत्त्रिपाञ्च ग्राह्या यथैवाम्बुधरास्तथैव।।२५।।**

उल्कानिपाताः। तडितो विद्युतः प्रघाताः। अशनिपाताः। आसां लक्षणानि पुरस्तादाचार्य एवं वक्ष्यति। दिग्दाहो दिशां दाहः। निर्घातो नभः शब्दा। महीप्रकम्पे भूमिकम्पः। मृगाणामरण्य-प्राणिनां सपतत्त्रिणां पक्षिसहितानां नादाः शब्दा यथा येन प्रकारेणाम्बुधरास्तथा तेनैव प्रकारेण ग्राह्या गृहीतव्याः। पूर्वोद्भूतैः सस्यनिष्पत्तिरब्दैरिति न्यायेन।

अथ ये पूर्वं चतसृषु दिक्षु कुम्भाः स्थापितास्तैः शुभाशुभज्ञानमाह-

**नामाङ्कितैस्तैरुदगाहिकुम्भैः प्रदक्षिणं श्रावणमासपूर्वैः।**

**पूर्णैः स मासः सलिलस्य दाता स्त्रुतैरवृष्टिः परिकल्प्यमूनेः।।२६।।**

**अन्यैश्च कृम्भैर्नृपमानचिह्नैर्देशाङ्कितैश्चाप्यपरैस्तथैव।**

**भग्नैः स्त्रुतैर्न्युनजलैः सुपूर्णैर्भाग्यानि वाच्यानि पथानुरूपम्।।२७।।**

अन्यैरपरैरपि कुम्भैर्नृपनामचिह्नैर्नृपाणां राज्ञां नाम्ना संज्ञया चिह्नैरुपलक्षितैस्तथा तेनैव प्रकारेणापरैरन्यैर्देशाङ्कितैर्देशनाम्ना चिह्नितैः। एतदुक्तं भवति- तत्र बहव उदकुम्भा नृपदिग्देशचातु-र्वर्ण्यैश्चिह्निताः शुभाशुभज्ञानार्थं स्थाप्याः। तैश्च भग्नैः स्त्रुतैर्न्युनजलैः सुपूर्णैर्यथानुरूपं यथासादृश्यं भाग्यानि शुभाशुभानि वाच्यानि वक्तव्यानि। एतदुक्तं भवतितैः कुम्भैः परिपूर्णैरतिशुभ। भग्नैर्नष्टैः स्त्रुतैरुपद्रवाः। ऊनजलैर्मध्यमं फलम्। तथा च काश्यपः-

**बृ.सं,पृ-३६०**

अथ रोहितण्याश्चन्द्रसंस्थाने विशेषेण शुभाशुभफलमाह-

**दूरगो निकटगोऽथवा शशी दक्षिणे पथि यथातथा स्थितः।**

**रोहिणी यदि युनक्ति सर्वथा कष्टमेव जगतो विनिर्दिशेत्।।२८।।**

शशी चन्द्रो यथा येन प्रकारेण तथा तेन प्रकारेण दूरगो विप्रकृष्टस्थो निकटगः समीपस्थो वा दक्षिणे पथि दक्षिणस्यां दिशि स्थितो यदि रोहिणीं प्राजपत्यं युवति संयोगं याति तदा जगतो जनपदस्य कष्टमशुभं दुर्भिक्षजनमरकादिकं विनिर्दिशेदढ वदेत्।

अन्यदप्याह

**स्पृशन्नुदग्याति यदा शशाङ्कस्तदा सुवृष्टिर्बहुलोपसर्गा।**

**असंपृशन्योगमुदक्समेतः करोति वृष्टिं विपुलां शिवञ्च।।२९।।**

रोहिण्याः स्पृशन्नेव दक्षिणेन स्पर्शं कृत्वा यद्युत्तरेण शशाङ्को याति गच्छति तदा बहुलोपसर्गा प्रभूतोपद्रवा बहुभिर्दोषैर्युक्ता सुवृष्टिः शोभनवृष्टिर्भवति। लोकानामुपद्रा भवन्ति, यथा कालोचिता वृष्टिर्भवतीत्यर्थः। अथवा रोहिण्या योगमसंस्पृशन्नादावुदक्समेत उत्तरेण गतस्तदा सुवृष्टिं शोभनवृष्टिं विपुलां विस्तोर्णा करोति। शिवं श्रैयश्च भवति।

अथ रोहिण्याः शकटमध्यगते चन्द्रे फलमाह-

**रोहिणीशकटमध्यसंस्थिते चन्द्रमस्यशरणीकृता जनाः।**

**क्वापि यान्ति शिशुयाचिताशनाः सूर्यतप्तपिठराम्बुपायिनः।।३०।।**

शकटभेदलक्षणं गणित उक्तम्। तथा च ब्रह्मसिद्धान्ते - **बृ.सं,पृ-३६१**

चन्द्रमसि रोहिण्याः शकटमध्यसंस्थिते जना लोको अशरणीकृता निःशरणीभूताः क्वापि यान्ति कुत्रापि गच्छन्ति। केचित् प्रजा इति पठन्ति। प्रजाः क्वापि यान्ति। कीदृशाः शिशुयाचिताशनाः , शिशवो बालास्तेषामशनं भोजनं याचमानाः प्रार्थयमानाः। तथा सूर्येणाऽऽदित्येन पिठरे भाण्डविशेषे तप्तं परितापितं यदम्बु पानीयं तत्पायिनस्तत्पानशीलाः। अनेन जलाभाव उक्तः। षट्तारकत्वाद्रोहिण्याः शकटः समूहः।

अथ रोहिण्याः पश्चिमदिक्स्थे चन्द्रमसि फलमाह-

**उदितं यदि शीतदीधिकतिं प्रथमं पृष्ठत एति रोहिणी।**

**शुभमेव तदा स्मरातुराः प्रमदाः कामवशेन संस्थिताः।।३१।।**

शीतदीधितिं चन्द्रं प्रथममादौ यद्युदितमभ्युद्गतं तस्य च पृष्ठतः पश्चाद्रोहिणी एत्यागच्छति समुदेति, तदा शुभमेव शोभनं लोके। प्रमदाः स्त्रियः स्मरातुराः कामार्ताः कामवशेन संस्थिताः कामुकानां वशवर्तिन्यो भवन्ति।

अथ रोहिण्या पूर्वस्यां दिशि स्थिते चन्द्रे फलमाह-

**अनुगच्छति पृष्ठतः शशी यदि कामी वनितामिव प्रियाम्।**

**मकरध्वजबाणखेदिताः प्रमदानां वशगास्तदा नराः।।३२।।**

रोहिण्याः शशी चन्द्रो यदि पृष्ठतः पश्चादनुगच्छत्युदेति प्रियां वनिता वल्लभां स्त्रियं कामिनीं कामी कामुको यथा अनुगच्छतिः। तदा प्रमदानां स्त्रीणां तस्मिन् वर्षे नराः पुरुषा मकरध्वजबाणखेदिताः कामशरपीडिताः सन्तो वशगा भवन्ति।

अथ रोहिण्याः शेषासु दिक्षु स्थिते चन्द्रे फलमाह-

**आग्नेय्यां दिशि चन्द्रमा यदि भवत्तत्रोपसर्गो महान्**

**नैर्ऋत्यां समुपद्रुतानि निधनं सस्यानि यान्तीतिभिः।**

**प्राजेशानिलदिक्स्थिते हिमकरे सस्यस्य मध्यश्चयो**

**याते स्थाणुदिशं गुणाः सुबहवः सस्यार्घवृष्टयादयः।।३३।।**

**ताडयेद्यदि च योगतारकामावृणोति वपुषा यदापि वा।**

**ताडने भयमुशन्ति दारुणं छादने नृपबधोऽङ्गनाकृतः।।३४।।**

तां च योगतारकां यदि ताडयेद् भिन्द्यात् श्रृङ्गैकदेशेन स्पृशतीत्यर्थः। अथवा वपुषा शरीरेणावृणोत्याच्छादयति, तदा ताडने दारुणं तीव्रं भयं भीतिमुशन्ति कथयन्ति। तथा छादने अङ्गनाकृतः स्त्रीकृतो नृपस्य राज्ञो बधः मरणमुशन्ति।

अन्यदपि शुभाशुभज्ञानमाह-

**गोप्रवेशसमयेऽग्रतो वृषो याति कृष्णपशुरेव वा पुरः।**

**भूरि वारि शबले तु मध्यमं नो सितेऽम्बुपरिकल्पनापरैः।।३५।।**

अपरैर्वर्णैरम्बुपरिकल्पना स्वबुद्धया कार्या। शुक्लवर्णवर्जैरन्यैर्वर्णैः किञ्चित् किञ्चिद् भवतीत्यर्थः। तथा च गर्गः। **बृ.सं,पृ-३६३**

अथास्तमयवेलायां पुरद्वारमभिगम्य निमित्तान्युपलक्षयेत्। तत्र गोगजाश्वरप्रथमप्रवेशे पुरविजयो वानरखरोष्ट्रेनकुलमार्जारप्रवेशे विद्रवो नेत्राङ्गहीनप्रवेशे त्वशनिभय इति।

अथादर्शने चन्द्रमसः फलमाह-

**दृश्यते न यदि रोहिणीयुतश्चन्द्रमा नभसि तोयदावृते।**

**रुग्भयं महदुपस्थितं तदा भूश्च भूरिजलसस्यसंयुता।।३६।।**

यदि नभस्याकाशे तोयदावृते मेघच्छन्ने चन्द्रमा रोहिणीयुतो न दृश्यते लोके तदा तस्मिन् वर्षे महदवतीव रुग्भयं रोगभयमुपस्थितं प्राप्तं वदेत्। भूश्च भूमिभूरिजलसस्यसंयुता बहुभिस्तोयैः सस्यैश्च युक्ता भवतीति।

## ५. स्वातियोगाध्यायः

तत्रादावेवां रोहिणीयोगोक्तस्य फलस्यातिदेशं -

**यद्रोहिणीयोगफलं तदेव स्वातावषाढासहिते च चन्द्रे।**

**आषाढशुक्ले निखिलं विचिन्त्यं योऽस्मिन् विशेषस्तमहं प्रवक्ष्ये।।१।।**

रोहिणीसहित चन्द्रे यद्योगफलं प्रागुक्तं तदेव स्वातिसहिते चन्द्रे आषाढासहिते फलं निखिलं निःशेषं विचिन्त्यं विचारणीयम्। किन्त्वाषाढशुक्ले शुचौ शुक्लपक्ष एतद्योगद्वयं विचार्यम्। एतदुक्तं भवति –मेघानां वायोश्चात्पातानां च यत्फलं रोहिणीयोग उक्तं तत्सर्वं स्वात्याषाढास्थे चन्द्रमसि ज्ञातव्यम्। तदा दूरगो निकटगोऽथवा शशी इत्यादि। यथासम्भवं समागमफलं यदुक्तं तत्सर्वमत्रैव वेदितव्यम्। तथा गोप्रवेशसमयेऽग्रतो वृष इत्यादिकं सर्वमपि वेदितव्यम्। तथा च पराशरः – सर्व एते योग मास्याषाढे भवन्ति। तान् दैवज्ञः प्रयतः शुचिरवधारयेत्, स्वातिसंयुते चन्द्रमसि घनस्निग्धस्तनित-विद्युन्मालैरम्भोदैर्नभसोऽवच्छादनं सुभिक्षक्षेमाय तद्वत्सर्ववातप्रादुर्भाव इति। उल्कानिर्घातकम्पोपघातैश्च विपर्यतःइति।

योऽस्मिन् विशेषस्तमहं प्रवक्ष्ये इति। अस्मिन् स्वातियोगे रोहिणीयोगाद्यो विशेषस्त महं प्रवक्ष्ये कथयिष्य इति।।

अथ तत्र रात्रौ दिवसे च वृष्टे शुभाशुभलक्षणमाह-

**स्वातौ निशांशे प्रथमेऽभिवृष्टे सस्यानि सर्वाण्युपयान्ति वृद्धिम्।**

**भागे द्वितीये तिलमुद्गमाषां ग्रैष्मं तृतीयेऽस्ति न शारदानि।।२।।**

**वृष्टेऽह्निभागे प्रथमे सुवृष्टिस्तद्वद् द्वितीये तु सकीटसर्पा।**

**वृष्टिस्तु मध्यापरभागवृष्टेनिश्छिद्रवृष्टिर्द्युनिशं प्रवृष्टे।।३।।**

स्वातौ स्वातियोगे प्रथमे निशांशे आद्यरात्रित्रिभागे वृष्टे सर्वाणि निःशेषाणि सस्यानि वृद्धिमुपयान्ति गच्छन्ति। द्वितीये रात्रित्रिभागे वृष्टे तिलमुद्गमाषा वृद्धिमुपयान्ति। तृतीये त्रिभागे वृष्टे ग्रैष्ममस्ति ग्रीष्मधान्यानि भवन्ति। शारदानि शरत्सस्यानि न भवन्ति।

अह्नि दिवसे प्रथमे आद्ये त्रिभागे वृष्टे सुवृष्टिः शोभना वृष्टिभवति। द्वितीये दिनवृष्टि-र्भवति। अपरभागे तृतीये दिनत्रिभागे वृष्टिर्मध्यमा भवति, नातिबह्वी नात्यल्पा। द्युतिशं प्रवृष्टे समग्रहोरात्रं प्रवृष्टे निश्छिद्रा छिद्ररहिता निर्दोषा वृष्टिर्भवति। सर्वत्र कालोचितं वर्षतीत्यर्थः। तथा च गर्गः- **बृ.सं,पृ-३६६**

अथापांवत्सनिकटस्थे चन्द्रमसि शुभाशुभमाह-

**सममुत्तरेण तारा चित्रायाः कीर्त्त्यते ह्यपांवत्सः।**

**तस्यासन्ने चन्द्रे स्वातेर्योगः शिवो भवति।।४।।**

चित्रायाः सममुत्तरेण समं कृत्वा उत्तरेण तिर्यग् या तारा स्थिता सापांवत्स इति कीर्त्त्यते कथ्यते। तस्यापांवत्सस्याऽऽसन्ने निकटस्थे चन्द्रे स्वातेर्योगश्चन्द्रसंयोगः शिवः श्रेयस्करो भवति।

अथ स्वातियोगस्य कालयोगमाह-

**सप्तम्यां स्वातियोगे यदि पतति हिमं माघमासान्धकारे**

**वायुर्वा चण्डवेगः सजलजलधरो वापि गर्जत्यजस्त्रम्।**

**विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं**

**विज्ञेया प्रावृडेषा मुदितजनपदा सर्वसस्यैरुपेता।।५।।**

माधमासस्यान्धकारे कृष्णपक्षे सप्तम्यां तिथौ स्वातिनक्षत्रयुक्ते चन्द्रे हिमं तुहिनं यदि पतति, वायुर्मारुतो वा चण्डवेगः पुरुषो महास्वनो वहति अथवा सजलो जलेन पानीयेन सहितो जलधरो मेघोऽजस्त्रमनवरतं वापि गर्जति शब्दं करोति। अथवा नभ आकाशं विद्युन्मालाभिराकुलं सौदामिनीनां पंक्तिभिर्व्याप्तम् नष्टचन्द्रार्कतारं नष्टा अदर्शनं गताश्चन्द्रतारकार्काः सोमतारकसूर्या यत्र मेघच्छन्नमित्यर्थः, तदैषा प्रावृड् वर्षा मुदितजनपदा प्रहृष्टलोका सवैर्निः शेषैः सस्यैरुपेता संयुक्ता विज्ञेया विज्ञातव्या।

अन्यदपि शुभाशुभफलक्षणमाह-

**तथैव फाल्गुने चैत्रे वैशाखस्यासितेऽपि वा।**

**स्वातियोगं विजानीयादाषाढे च विशेषतः।।६।।**

यथा सप्तम्यां स्वातियोगे यदि पतति हिमित्याद्युक्तं तथैव फाल्गुने मासि स्वातौ भवति। चैत्रे वैशाखमासस्यासिते कृष्णपक्षेऽपि स्वातियोगं विजानीयाद्विन्द्याद्विचारयेत्। विशेषत आषाढस्य यः स्वतियोगस्तं विचारयेदिति। अनार्षोऽयं श्लोकः।

## ६. अथाषाढीयोगाध्यायः

तत्र तावद्रोहिणीयोगफलं यदुक्तं तत्सर्वमुत्तराषाढायुक्ते चन्द्रमसि विज्ञातव्यं तथाषाढपौर्णमास्यां विचारयेत्। तथा च पराशरः- **बृ.सं,पृ-३६८**

अतोऽनन्तरमाषाढासंयुक्ते शशिन्यादानविसर्गान्तर्भागेषु निमित्तानि प्रावृष्याद्यन्तमध्येषु फलन्ति। तत्र सुरभिरनुकूलः स्पर्शवान् मारुतः पूर्वपूर्वोत्तरोऽविर्षसस्यकरो नैर्ऋताग्नेययाम्यवा-रुणवायव्या मध्य-सस्यकराः। विपर्ययो विपरीतेषु। वैदूर्यरजतमधुहेमप्रभा सन्ध्या स्निग्धाभ्रवृक्षप्रादुर्भावश्च प्रावृड्वृद्धये। प्राङ्मध्यपश्चाद्भागेष्वाषाढानां योगः शशिनो वर्षासु तत्कालमेव वर्षाय। वैश्वदेवादुत्तरतः शशी वर्षकरो न दक्षिणतः। निर्घाताल्काशनिभूच-लदण्डान्यावग्रहोपतापे सस्यवधो भवति। भवति चात्र-

अथाषाढीयोगे यत्कर्तव्यं तदाह-

**आषाढयां समतुलिताधिवासिताना मन्येद्युर्यदधिकतामुपैति बीजम्।**
**तद्वृष्टिर्भवति न जायते यदूनं मन्त्रोऽस्मिन् भवति तुलाभिमन्त्रणाय।।१।।**

आषाढस्येयं पौर्णमासी आषाढी। उत्तराषाढायुक्तेत्यर्थः। तथा च गर्गः- **बृ.सं,पृ-३६८**

तस्यामाषाढयां सर्वबीजानां समतुलिताधिवासितानां समं कृत्वोनातिरिक्तवर्ज यानि बीजानि धान्यादीनि तुलितानि तुलया परिच्छिन्नानि तेषां तथाभूतानामधिवासितानाम्। अधिवाससा महाव्रत-मन्त्रेणाभिमन्त्र्य रात्रिमेकामुषितानि। ततोऽन्येद्युरन्यसिमन्नहनि द्वितीयदिवसे यद्बीजं तुलिमंतमधिक-तामुपैत्याधिक्यं गच्छति तद्वृद्धिस्तस्य धान्यादेस्तमिन् वर्षे वृद्धिर्भवति। यदूनं भवति तन्न जायते नोत्पद्यते। मन्त्रोऽस्मिन् भवति तुलाभिमन्त्रणाय। अस्मिंस्तुलाकर्मणि तुलाभिमन्त्रणाय मन्वो भवति येन तुलाभिमन्त्र्यते इत्यर्थः। तथा च समासरंहितायाम्- **बृ.सं,पृ-३६९**

अथ तं मन्त्रमार्षमाह-

**येन सत्येन चन्द्रार्कौ ग्रहा ज्योतिर्गणास्तथा।**
**उत्तिष्ठन्तीह पूर्वेण पश्चादस्तं व्रजन्ति च।।२, ३।।**
**ब्रह्मणो दुहितासि त्वमदित्येति प्रकीर्तिता।**
**काश्यपी गोत्रतश्चैव नामतो विश्रुता तुला।।४, ५।।**

स्तोतव्येति। सा तुला अनेन मन्त्रयोगेन सह स्तोतव्या स्तवनीया। सत्या सत्यरूपा सरस्वती देवी। हे सत्ये सत्यरूपे यत्सत्यं परमार्थं दर्शयिष्यसि यस्मादसि त्वं सत्यव्रता। सत्यमेव व्रतं यस्याः।

चन्द्रार्कौ शशिसूर्यौ ग्रहाश्चान्ये भौमादयः। तथा ज्योतिर्गणाः। ज्योतिषां ताराणां गणाः समूहा येन सत्येन पूर्वेण पूर्वस्यां दिश्युत्तिष्ठन्ति उदयं यान्ति इहास्मिंल्लोके तथा पश्चात्पश्चिमायां दिश्यस्तं व्रजन्ति अस्तमयं यान्ति।

तथा सर्वेषु वेदेषु यत्सत्यं तत्सत्यं ब्रह्मवादिषु परं ब्रह्म ये वदन्ति। त्रिषु लोकेषु भूर्भुवः स्वराख्येषु यत्सत्यं तत्सत्यमिहास्मिंस्तुलाकर्मणि दृश्यताम्।

त्वं ब्रह्मणः कमलजस्य दुहिता तनया असि भवसि, तथा आदित्या अदितेरपत्यमित्येवं प्रकारा प्रकीर्तिता कथिता। गोत्रतः काश्यपी कश्यपगोत्रो। नामतः संज्ञया तुला इति च विश्रुता ख्याता।

अथ तुलाया लक्षणमाह-

**क्षौमं चतुसूत्रकसन्निबद्धं षडङ्गुलं शिक्यकवस्त्रमस्याः।**
**सूत्रप्रमाणं च दशाङ्गुलानि षडेव कक्ष्योभयशिक्यमध्ये।।६।।**

अस्यास्तुलायाः शिक्यकवस्त्रं क्षौमं कार्यम्। यत्र स्थितानि द्रव्याणि परिच्छिद्यन्ते तच्छिक्यवस्त्रं तच्चतुः सूत्रकासन्निबद्धम्, चतुर्भिः सूत्रैस्तन्तुभिः सन्निबद्धं संलग्नं कार्यम्। तच्च शिक्यकवस्त्रं षडङ्गुलं षडङ्गुलप्रमाणम्। यः सूत्रैस्तद्बध्यते, तेषां प्रमाणं दशाङ्गुलानि। उभय-शिक्यमध्ये शिक्यद्वयस्यान्तः कक्ष्यासूत्रं षडङ्गुलं कार्यम्। कक्ष्यासूत्रेण ग्रहणसूत्रमुच्यते।

कथं तत्र द्रव्याणि परिच्छेद्यानीत्याह-

**याम्ये शिक्ये काञ्चनं सन्निवेश्यं शेषद्रव्याण्युत्तरेऽम्बुनि चैव।**
**तोयैः कौप्यैः सैन्धवैः सारसैश्च वृष्टिर्हीना मध्यमा चोत्तमा च।।७।।**
**दन्तैर्नागा गोहयाद्याश्च लोम्ना हेम्ना भूपाः शिक्थकेन द्विजाद्याः।**
**तद्वद्देशा वर्षमासा दिशश्च शेषद्रव्याण्यात्मरूपस्थितानि।।८।।**

**हैमी प्रधाना रजतेन मध्या तयोरलाभे खदिरेण कार्या।**
**विद्धः पुमान् येन शरेण सा वा तुला प्रमाणेन भवेद्वितस्तिः।।९।।**

**हीनस्य नाशोऽभ्यधिकस्य वृद्धिस्तुल्येन तुल्यं तुलितं तुलायाम्।**
**एतत्तुलाकोशरहस्यमुक्तं प्रोजेशयोगेऽपि नरो विदध्यात्।।१०।।**

तुलायां तुलितस्य परिच्छन्नस्य द्रव्यस्य हीनस्य नाशः क्षयो वक्तव्यः। अभ्यधिकस्य वृद्धिः। तुल्येन समेन तुल्यं समम्। न हानिर्न च वृद्धिः। तथा च गर्गः- **बृ.सं,पृ-३७१**

अन्यस्मिन् योगत्रयेऽीप पापग्रहा व्यवस्थिता न शुभदाः। अधिमासके सति योगे विशेषविधानमाह-

**स्वातावषाढास्वथ रोहिणीषु पापग्रहा योगगता न शस्ताः।**

**ग्राह्यं तु योगद्वयमप्युपोष्य यदाधिमासो द्विगुणीकरोति।।११।।**

स्वातौ स्वातिसंयुक्ते चन्द्रे। आषाढासूत्तराषाढासु युक्तं च। अथव रोहिणीसंयुक्ते चन्द्रे। एतेषु त्रिषु योगेषु पापग्रहा भौमसौरराहुकेतवो योगगतास्तत्र स्थिता न शुभदा न शस्ताः। तथा च गर्गः-

**बृ.सं,पृ-३७२**

**निष्पत्तिरग्निकोपो वृष्टिर्मन्दाथ मध्यमा श्रेष्ठा।**

**बहुजलपवना पुष्टा शुभा च पूर्वादिभिः पवनैः।।१३।।**

पूर्वाद्यासु दिक्ष्वष्टसु पवनैर्वातैः क्रमैणैतानि फलानि। तत्र पूर्वस्यां दिशि यदा वातो वहति तदा निष्पत्तिः सस्यानां भवति। सस्यानि सर्वाणि निष्पद्यन्ते। अग्निकोपीऽग्नि-भयमाग्नेय्याम्। बहुजलपवना अल्पा दक्षिणस्याम्। मध्यमा वृष्टिनैर्ऋत्याम्। श्रेष्ठा प्रधाना वृष्टिः पश्चिमायाम्। बहुजलपवना प्रभूतोदका प्रभूतवाता वायव्याम्। पुष्टा परिपूर्णा अतिशोभनो-त्तरस्याम्। शुभा अतिश्रेयस्करी ऐशानी वृष्टिरिति। रोहिणीयोगे वायुश्चैवं दिक्षु धत्ते फलानि इत्युक्तत्वात्पुनः करणं निष्पतिरग्निकोप इत्यादिकं शिष्यं भ्रान्तिनिरासाय कृतमिति।

## ७. वातचक्राध्यायः

अतः परं केचिद्वातचक्रं पठन्ति। तच्च वराहमिहिरकृतं न भवति। यतः-

इत्यनेन पौनरुक्त्यं भवति। बहुष्वादर्शेषु च दृश्यते। अतोऽस्माभिः सरसत्वाद् व्याख्यायते शिष्यहितार्थम्। तत्राादावैशान्यां दिशि स्थितस्य वातस्य लक्षणमाह-

**आषाढपौर्णमास्यां तु यद्यैशानोऽनिलो भवेत्।**

**अस्तं गच्छति तीक्ष्णांशौ सस्यसम्पत्तिरुत्तमा।।१।।**

आषाढमासस्य पौर्णमास्यां तीक्ष्णांशावर्केऽस्तं गच्छति यद्यैशान ऐशान्यां दिशिअनिलो वातो भवेद्वहति तदा सस्यानां धान्यादीनां सम्पत्तिरुत्तमा प्रधाना भवति।

अथ पूर्वस्यामाह-

**पूर्वः पूर्वसमुद्रवीचिशिखरप्रस्फालनाघूर्णित-**

**श्चन्द्रार्कांशुसटाकलापकलितो वायुर्यदाकाशतः।**

**नैकान्तस्थितनीलमेघपटला शारद्यसंवर्धिता**

**वासन्तोत्कटसस्यमण्डिततला सर्वा मही शोभते।।२।।**

तस्यामेवाषाढपौर्णमास्यां पूर्वो वायुः पूर्वस्यां दिशि यस्मिन् काले आकाशतो नभसो वहतीत्यर्थः। कीदृशो वायुः? पूर्वसमुद्रस्य प्रागुदधेर्ये वीचय ऊर्मयस्तेषां ये शिखरा अग्राणि तेषां प्रस्फालनां चालनं तेन घूर्णितो भ्रमितः। तथा चन्द्रार्कयोः सूर्यशशिनोर्येंऽशवो रश्मयस्त एव सटाः स्कन्धावलम्बिनः केशा इव तेषां यः कलापो विस्तारस्तेन कलितो मिश्रितः। तदा मही कीदृशी भवति? नैकान्तस्थितेति। नैकान्तमत्यर्थमेव सर्वत्र ये स्थिता नीलवर्णानां मेघानां पटलाः समूहास्तैः शोभिता। तथा शारद्यसंवर्धिता। शारद्यैः सस्यैर्धान्यादिभिः संवर्धिता समृद्धयुक्ता भवति। तथा वासन्तैर्वसन्सम्भवैरुत्कटैरतिसमृद्धै सस्यैर्मण्डित भूषितं तलं पृष्ठं यस्याः सा तथाभूता। सर्वां निःशेषा मही भूः शोभते विराजते।

अथाग्नेय्यामाह-

**यदा वह्नौ वायुर्वहति गगने खण्डिततनुः**

**प्लवत्यस्मिन् योगे भगवति पतङ्गे प्रवसति।**

**तदा नित्योद्दीप्ता ज्वलनशिखरालिङ्गिततला**

**स्वगात्रोष्मोच्छ्वासैर्वमति वसुधा भस्मनिकरम्।।३।।**

यदा यस्मिन् काले वायुः पवनो वह्नावाग्नेय्यां दिशि वहति। गगने आकाशे। कीदृशः? अखण्डिततनुः। अखण्डिता तनुर्यस्य अविहतगतिरित्यर्थः। प्लवति प्रवहति अस्मिन्नाषाढीयोगे। कदा भगवति पतङ्गे सूर्ये प्रवसतयस्तमेति सति। तदा तस्मिन् वर्षे वसुधा भूर्नित्योद्दीप्ता सर्वकाल-मुज्ज्वलिता। ज्वलनशिखरालिङ्गिततला ज्वलनस्याग्नेर्ये शिखरा ज्वालाग्राणि तैरालिङ्गितं परिष्वक्तं तलं यस्या। तथाभूता स्वगात्रोष्मोच्छ्वासैः स्वगात्रादात्मीयदेहाद्य ऊष्मा स एवोच्छत्रवासास्तैस्तथाभूतैर्बहुप्रकारैः स्वगात्रोष्मोच्छ-त्रवासैर्भस्मनिकरं भस्मसमूहं वमत्युद्गिरति।

अथ दक्षिणस्यामाह-

**तालीपत्रलतावितानतरुभिः शाखामृगान्नर्तयन्**
**योगेऽस्मिन्प्लवति ध्वनिः सपरुषो वायुर्यदा दक्षिणः।**
**तद्वद्योगसमूत्थितस्तु गजवत्तालाङ्कुशैर्घाट्टिताः**
**कीनाशा इव मन्दवारिकणिका मुञ्चन्ति मेघास्तदा।।४।।**

**सूक्ष्मैलालवलीलवङ्गनिचयान् व्याघूर्णयन् सागरे**
**भानोरस्तमये प्लवत्यविरतो वायुर्यदा नैर्ऋतः।**
**क्षुत्तुष्णावृतमानुषास्थिशकलप्रस्तारभारच्छदा**
**मत्ता प्रेतवधूरिवोग्रचपला भूमिस्तदा लक्ष्यते।।५।।**

**यदा रेणूत्पातैः प्रविचलसटाटोपचपलः।**
**प्रवातः पश्चाच्चेद्दिनकरापातसमये।**
**तदा सस्योपेता प्रवरनिकाबद्धसमरा**
**क्षितिः स्थानस्थानेष्वविरतवसामांसरुधिरा।।६।।**

**आषाढीपर्वकाले यदि किरणपतेरस्तकालोपपत्तौ**
**वायव्यो वृद्धवेगः पवनघनवपुः पन्नागार्द्धानुकारी।**
**जानीयाद्वारिधाप्रमुदितमुदितामुक्तमण्डूककण्ठां**
**ससयोद्भासैकचिह्नां सुखबहुलतया भाग्यसेनामिवोर्वीम्।।७।।**

आषाढी पौर्णमासी सैव पर्व तस्य कालस्तस्मिन् यदि चेत् करणपतेः सूयस्यास्त-कालोपपत्तावस्तमयसमयप्राप्तौ वायव्यो वातो वृद्धवेगश्चण्डशब्दो यदि वहति। कीदृशः? पवनघनवपुः पवनश्चासै घनवपुः , घनं समन्ततो वपुः शरीरं यस्य। तथा पन्नागार्द्धानुकारी,

पन्नगाः सर्पास्तेषामर्द्धानि खण्डान्यनुकरोति। रेणुसमायोगत्वात् सन्ततत्वोच्चेतयर्थः। केषाञ्चित् पाठः पन्नागादानुकारी, पन्नगाः, सर्पास्तानत्ति भक्षयति गरुणस्तदनुकारी। अतिवेगसमा-युक्तत्वाद् गरुडवेग इव स वायुर्लक्ष्यते। तदा तस्मिन् वर्षे उर्वी भूमिं कीदृशी जानीयाद्विन्द्यात्। वारिधारा-प्रमुदितमुदितामुक्तमण्डूककण्ठामिति, वारिणो जलस्य या धारास्ताभिः प्रकर्षेणा-तिशयेन या मुद्धर्ष-मिता प्राप्ता तया मुदिता हष्टा मत्ता ये मण्डूका भेकास्तेषामामुक्ता अतिशब्दाः कण्ठा गलाश्च यस्याम्। तथा सस्यानामुद्भासो बीजोत्पत्तिः स एकचिह्नं ललाटे यस्याम्। सुखानां बहुलतया सामग्र्या जनानामतिसुखितत्वाद् भाग्यसेनां भाग्यचमूमिव।

अथोत्तरस्यामाह-

**मेरुग्रस्तमरीचिमण्डलतले ग्रीष्मावसाने रवौ**
**वात्यामोदिकदम्बगन्धसुरभिर्वायुर्यदा चोत्तरः।**
**विद्युद्भ्रान्तिसमस्तकान्तिकलना मत्तास्तदा तोयदा**
**उन्मत्ता इव नष्टचन्द्रकिरणां गां पूरयन्त्यम्बुभिः।।८।।**

**वृत्तायामाषाढयां कृष्णचतुर्थ्यामजैकपादर्क्षे।**
**यदि वर्षति पर्जन्यः प्रावृट् शस्ता न चेन्न तदा।।९।।**

आषाढपौर्णमास्यां वृत्तायामतीतायां पुरतःकृष्णचतुर्थ्यां तिथावजैकपादर्क्षे पूर्वभद्र-पदानक्षत्रे यदि पर्जन्यो मेघो वर्षति तदा प्रावृड् वर्षाफ शस्ता शुभप्रदा। न चेद्यदि न वर्षति तदा न शुभेति।

**(ऐशानी यदि शीतलोऽमरगणैः संसेव्यमानो भवेत्**
**पुन्नागागरुपारिजातसुरभिर्वायुः प्रचण्डध्वनिः।**
**आपूर्णोदकयौवना वसुमती सम्पन्नसस्याकुला**
**धर्मिष्ठाः प्रणतारयो नृपतयो रक्षन्ति वर्णास्तदा।।)**

अन्यदप्याह-

**नष्टचन्द्रार्ककिरणं नष्टतारं न चेन्नभः।**
**न तां भद्रपदां मन्ये यत्र देवो न वर्षति।।१०।।**

यस्यां भद्रपदायां नभ आकाशं नष्टचन्द्रार्ककिरणं भवति। नष्टा अदर्शनं गताश्चन्द्रार्कयोः शशिसूर्ययोः किरणा यत्र तत्तथाभूतम्। मेघच्छन्नत्वात्। तथा नष्टतारम् नष्टा अदर्शनं गतास्तारा नक्षत्राणि यत्र। यस्यां भद्रपदायां देवो न वर्षति न तां भद्रपदामिति मन्ये जाने इति। अनार्षाविमौ श्लोकौ।

## ८. सद्योवर्षणाध्यायः

तत्रादावेव वर्षपृच्छायां वर्षज्ञाने प्रश्नमाह-

**वर्षाप्रश्ने सलिलनिलयं राशिमाश्रित्य चन्द्रो**
**लग्नं यातो भवति यदि वा केन्द्रगः शुक्लपक्षे।**
**सौम्यैर्दृष्टः प्रचुरमुदकं पापदृष्टोऽल्पमम्भः**
**प्रावृट्काले सृजति न चिराच्चन्द्रवद्भार्गवोऽपि।।१।।**

वर्षाप्रश्ने वृष्टिपृच्छायां चन्द्रः शशी सलिलनिलयं जलाश्रयं राशिमाश्रित्य कर्कटमकरमी-नानामन्यतमं संश्रित्यं लग्नं तात्कालिकं पृच्छालग्नं यातः प्राप्तस्तत्र व्यवस्थितः, एको योगो भवति। यदि वा केन्द्रगः शुक्लपक्षे प्रश्नकाले न लग्नगश्चन्द्रमा जलराशिस्थोऽप्यन्यस्मिन् केन्द्रे चतुर्थसप्तम-दशमानामन्यतमे भवति। किं सर्वदा। न हि, शुक्लपक्षे। तदैतदुक्तं भवति- कृष्णपक्षे वर्षपृच्छायां यदि जलचराशिव्यवस्थितश्चन्द्रमा लग्ने भवति शुक्ले पुनर्जलराशयाश्रित एव लग्नवर्जमन्यकेन्द्रगतो भवति, तदा द्वितीयो योगः। अस्मिन् योगद्वये प्रावृट्काले वर्षासमये न चिराच्छीघ्रमेवाम्भः पानीयं सृजति ददाति। अत्रैव जलस्याल्पत्वं प्रभूतत्वमाह- सौम्यर्दृष्टः प्रचुरमिति। यथादर्शितयोगस्थः शशी जलं सृजति। पापैरादित्यभौमसौराणामन्यतमेन दृष्टोऽल्पं स्तोकमम्भो जलं सृजति। अर्थादेव मिश्रदृष्टो मध्यमं जलं सृजति तदा प्रावृट्काले। प्रावृट्का-लग्रहणमन्यकालव्युदासार्थम्। सृजति मुञ्चति न चिरात् तस्मिन्नहन्येव। चन्द्रवद्भार्गवोऽपि, भार्गवः शुक्रश्चन्द्रवज्ज्ञेयः। एतदुक्तं भवति। वर्षाप्रश्ने सलिलनिलयं राशिमाश्रित्य शुक्रो लग्नयातो भवति कृष्णपक्षे तथा शुक्लपक्षे केन्द्रगस्तत्र च योगद्वयोऽपि सौम्येर्दृष्टः, प्रचुरमुदकं पापदृष्टोल्पमम्भो मिश्रदृष्टो मध्यमं जलं सृजति।

नन्वत्र यदुक्तम्, लग्नं यातो भवति यदि वा केन्द्रगः शुक्लपक्षे इति तत्किमनने लग्नग्रहणेन, केन्द्रग्रहणेनैव लग्नं परिगृहीतमेव। यस्मात् सञ्ज्ञाध्यायेऽभिहितम् कण्टककेन्द्रच-तुष्टयसञ्ज्ञा सप्तमलग्नचतुर्थखभानाम् तस्माल्लग्नग्रहणमत्रातिरिच्यत इति। अत्रोच्यते भवति यदि वा केन्द्रगः शुक्लपक्षे इति यदुक्तं तदनेनैव विकल्पेनाचार्येण कृष्णपक्षे वर्षप्रश्नपरिज्ञानं सविकल्पनमभिहितम् तेन शुक्लपक्षे लग्नादन्यतमे केन्द्रे वा जलराशिव्यवस्थितश्चन्द्रमाः सौम्यैर्यदि दृश्यते तदा सुप्रभृतं पानीयं मुञ्चति, पापदृष्टोऽल्पम् मिश्रदृष्टो मध्यमम्। कृष्पक्षे पुनर्लग्न एव केन्द्रो यदि भवति तत्रस्थः सौम्यैर्दृश्यते तदा प्रचुरं पानीं मुञ्चति पापदृष्टोऽल्पम्

मिश्रदृष्टो मध्यमम्। अन्यकेन्द्रव्यवस्थिते शशिनि सौम्यग्रहदृष्टोऽपि पानीयं नास्त्येव। कुत एतन्निश्चीयते ननु। विकल्पादवगतं भवति। यदि वा केन्द्रगः शुक्लपक्षेऽतोऽर्थादेवावगम्यते। लग्नकेन्द्रमुक्त्वा कृष्णपक्षेऽन्यकेन्द्रचिन्ता नास्त्येव। तस्मान्न लग्नग्रहणमत्रातिरिच्यत इति। तथा च समाससंहितायाम् – **बृ.सं,पृ-३८१**

अथ सामान्येनोक्तम् अथान्यत्प्रश्नज्ञानमाह-

**आर्द्रं द्रव्यं स्पृशति यदि वा वारि तत्संज्ञकं वा**

**तोयासन्नो भवति यदि वा तोयकार्योन्मुखा वा।**

**प्रष्टा वाच्यः सलिलमचिरादस्ति निःसंशयेन**

**पृच्छाकाले सलिलमिति वा श्रूयते यत्र शब्दः।।२।।**

अथवा प्रष्टा वर्षप्रश्नपृच्छकः। आर्द्र द्रव्यं सरसं यत्किञ्चिद्वस्तुविशेषं स्पृशति। यदि वा वारि जलं स्पृशति। तत्संज्ञकं वारिसंज्ञकं यत्किञ्चितिं स्पृशति। यथा क्षीरं पयः शब्दवाच्यत्वात्त-त्संज्ञम्। अब्जा मुक्ताः। अम्बुबालकमित्येवमादि। अथवा प्रष्टा तोयासन्नो जलसमीपवर्ती यदि भवति। अथवा तोयकार्ये जलकार्ये उन्मुखो गन्तुं प्रवृत्तो भवति। तदा प्रष्टा एव वाच्यो वक्तव्यः यथा सलिलं जलम्। अचिराच्छघ्रमेव निःसंशयेन निर्विकल्पेनास्ति विद्यते। अथवा पृच्छाकाले वा प्रश्नसमये सलिलमिति शब्दो वा श्रूयते यत्र तत्र जलं निःसंशयेनास्तीति वक्तव्यम्। तथा च समाससंहितायाम् – **बृ.सं,पृ-३८१**

अथान्यद्वर्षज्ञानमाह-

**उदयशिखरिसंस्थो दुर्निरीक्ष्योऽतिदीप्त्या**

**द्रुतकनकनिकाशः स्निग्धवैदूर्यकान्तिः।**

**तदहनि कुरुतेऽम्भस्तोयकाले विवस्वान्**

**प्रतपति यदि चोच्चैः खं गतोऽतीव तीक्ष्णम्।।३।।**

**विरसमुदकं गोनेत्राभं वियद्विमला दिशो**

**लवणविकृतिः काकाण्डाभं यदा च भवेन्नभः।**

**पवनविगमः पोप्लुयन्ते झषाः स्थलगामिनो**

**रसनमसकृन्मण्डूकानां जलागमहेतवः।।४।।**

**मार्जारा भृशमवनिं नखैर्लिखन्तो लोहानां मलनिचयः सविस्त्रगन्धः।**

**रथ्यायां शिशुरचिताश्च सेतुबन्धाः सम्प्राप्तं जलमचिरान्निवेदयन्ति।।५।।**

गिरयोऽञ्जनचूर्णसन्निभा यदि वा बाष्पनिरुद्धकन्दराः।
कृकवाकुविलोचनीपमाः परिवेषाः शशिनश्च वृष्टिदाः।।६।।

गिरयः पर्वता अञ्चनचूर्णसन्निभाः कृष्णवर्णा यदि दृश्यन्ते। बाष्पेणोष्मणा निरुद्धाश्छन्नाः कन्दरा अवटा येषां तथाभूताः। शशिनश्चन्द्रस्य परिवेषा कृकवाकुविलोचनोपमाः। कृकवाकोर्ज-कुक्कुटस्य यादृग्विलोचनं नयनं तदुपमास्तत्सदृशाः। अतिलोहिता इत्यर्थः। एते सर्व एव वृष्टिदाः।

अन्यद्वर्षज्ञानमाह-

विनोपधातेन पिपीलिकानामण्डोपसंक्रान्तिरहिव्यवायः।
द्रुमावरोहंश्व भुजङ्गमानां वृष्टेर्निमित्तानि गवां प्लुतञ्च।।७।।

तरुशिखरोपगताः कृकलासा गगनतलस्थितदृष्टिनिपाताः।
यदि च गवां रविवीक्षणमूर्ध्वं निपतति वारि तदा न चिरेण।।८।।

कृकलासाः प्राणितस्तरूणां वृक्षाणां शिखरोपगता मूर्द्धनि स्थिताः। तत्र गगनतले आकाशतले स्थितदृष्टिनिपाता नभस्येव निरीक्षन्ते। यदि च गवामुक्षणामूर्ध्वमुपरि रविवीक्षणं सूर्यावलोकनं भवति तदा न चिरेण शीघ्रमेव वारि जलं निपतति वर्षतीत्यर्थः।

अन्यद्वर्षज्ञानमाह-

नेच्छन्ति विनिर्गमं गृहाद्धुन्वन्ति श्रवणान् खुरानपि।
पशवः पशुवच्च कुक्कुरा यद्यम्भः पततीति निर्दिशेत्।।९।।

यदा स्थिता गृहपटलेषु कुक्कुरा रुदन्ति वा यदि विततं वियन्मुखाः।
दिवा तडिद्यदि च पिनाकिदिग्भवा तदा क्षमा भवति समैव वारिणा।।१०।।

शुककपोतविलोचनसन्निभो मधुनिभश्च यदा हिमदीधितिः।
प्रतिशशी च यदा दिवि राजते पतति वारि तदा न चिरेण च।।११।।

स्तनितं निशि विद्युतो दिवा रुधिरनिभा यदि दण्डवत्स्थिताः।
पवनः पुरतश्च शीतलो यदि सलिलस्य तदाऽऽगमो भवेत्।।१२।।

यदि निशि रात्रौ स्तनितं मेघशब्दो तथा विद्युतस्तडितो दिवा दिवसे। कीदृश्यो विद्युतः। रुधिरनिभा अतिलोहितास्ताश्च दण्डवदूर्ध्वाधः स्थित्या स्थिताः। पवनो वायुः परतः पूर्वस्यां दिशि शीतलो वहति तदा सलिलस्य जलस्यागमो वृष्टिपातो भवत् स्यात्।

अन्यद्वर्षज्ञानमाह-

**वल्लीनां गगनतलोन्मुखाः प्रवालाः स्नायन्ते यदि जलपांशुभिर्विहङ्गाः।**

**सेवन्ते यदि च सरीसृपास्तृणाग्राण्यासन्नो भवति तदा जलस्य पातः।।१३।।**

वल्यःप्रसिद्धास्तासां प्रवाला अभिनवपत्राणि। गगनतलोन्मुखा ऊर्ध्वगामिनः। यदि च विहङ्गाः पक्षिणो जलपांशुभिर्जलेनोदकेन वा पांशुना धूल्या स्नायन्ते स्नानं कुर्वन्ति। सरीसृपाः कृमिजायतो यदि च तृणाग्राणि तृणप्रान्तानि सेवन्ते। तत्पृष्ठगता भवन्ति। तदा जलस्य पानीयस्य पात आसन्नो निकटो भवति। शीघ्रमेव वर्षतीत्यर्थः।

अन्यद्वर्षज्ञानमाह-

**मयूरशूकचाषचातकसमानवर्णा यदा जपाकुसुमपङ्कजद्युतिमुषञ्च सन्ध्याघनाः।**

**जलोर्मिनगनक्रकच्छपवराहमीनोपमाः प्रभूतपुटसञ्चया न तु चिरेण**

**यच्छन्त्यपः।।१४।।**

**पर्यन्तेषु सुधाशशाङ्कधवला मध्येऽञ्जनालित्विषः**

**स्निग्धा नैकपुटाः क्षरज्जलकणाः सोपानविच्छेदिनः।**

**माहेन्द्रीप्रभवाः प्रयान्त्यपरतः प्राग् वाम्बुपाशोद्भवा**

**ये ते वारिमुचस्त्यजन्ति न चिरादम्भः प्रभूतं भुवि।।१५।।**

एवंविधा ये वारिमुचो मेघास्ते न चिराच्छीघ्रमेव भुवि भूमावम्भो जलं प्रभूतं सुबहु त्यजन्ति विसृजन्ति। कीदृशाः। पर्यन्तेषु समन्ततः। सुधा मक्कोलः। शशाङ्कश्चन्द्रः। तद्वद्धवलाः शुक्लाः। तथा मध्ये मध्यभागेऽञ्जनालित्विषः। अञ्जनं कज्जलम्। अलिर्भ्रमरः। तद्वचित् कान्तिर्येषां ते तथाभूताः। तथा स्निग्धा निर्मलाः। नैकपुटा बहुभिः पुटैरुपलक्षिताः।उपर्युपरि स्थिता इत्यर्थः। क्षरज्जलकणाः, क्षरन्तस्त्यजन्तो जलकणा जलबिन्द्रवो येषां ते। सोपानविच्छेदिनः। सोपानवद्विच्छेदो येषां ते। सोपानपदपङ्क्तिन्यायेन स्थिता इत्यर्थः। माहेन्द्रीप्रभवाः पूर्वस्यां दिशि उत्पन्नाः। अपरतः पश्चिमायां दिशि प्रयान्ति गच्छन्ति। अम्बुपा-

शोद्भवाः। अम्बुपो वरुणस्तस्याशा वारुणी दिक् पश्चिमेत्यर्थः। तदुद्भवास्तत्सम्भूताः प्राग्वा पूर्वा वा दिशं यान्ति।

अन्यद्वर्षज्ञानमाह-

**शकचापपरिधप्रतिसूर्या रोहितोऽथ तडितः परिवेषः।**

**उद्गमास्तसमये यदि भानोरादिशेत् प्रचुरमम्बु तदाशु।।१६।।**

**यदि तित्तिरपत्रनिभं गगनं मुदिताः प्रवदन्ति च पक्षिगणाः।**

**उदयास्तमये सवितुर्द्युनिशं विसृजन्ति घना न चिरेण जलम्।।१७।।**

**यद्यमोघकिरणाः सहस्त्रगोरस्तभूधरकरा इवोच्छ्रिताः।**

**भूसमं च रसते यदाम्बुदस्तन्महद्भवति वृष्टिलक्षणम्।।१८।।**

सहस्त्रं गवां रश्मीनां यस्य स सहस्त्रगुप्तस्य सहस्त्रगोरादित्यस्य यद्यमोघकिरणाः। अमोधाख्या रश्मयः। तेषां लक्षणं वक्ष्यति- शुक्राः करा दिनकृतः इति। एवंविधा अमोघकिरणा अस्तभूधरकार इवोच्छ्रिताः। अस्तभूधरस्यास्तमयपर्वतस्योच्छ्रिता उच्चीकृताः करा हस्ता इव लक्ष्यन्ते। उदयास्तमययोश्चैवंविधा दृश्यन्ते। वक्ष्यत्याचार्यः। उदयेऽस्ते वा भाोनोर्ये दीर्धा रश्मयस्त्वमोघास्ते। तथाम्बुदो मेघो भूसमं क्षितितुल्यं रसते श्लिष्यते तदा तत्तस्मान्महद्वृष्टिलक्षणं भवति। अतिवृष्टिचिह्नं भवतीत्यर्थः। तथा च समाससंहितायाम्। **बृ.सं,पृ-३८७**

अत्र यानि सद्योवर्षचिह्नानि उक्तानि तेषु बलवत्सु महद्वृष्टिं मध्येषु मध्यमामल्पेष्वत्यल्पां वदेत्। तथा च पराशरः- **बृ.सं,पृ-३८८**

अन्यद्वर्षलक्षणमाह-

**प्रावृषि शीतकरो भृगुपुत्रात् सप्तमराशिगतः शुभदृष्टः।**

**सूर्यसुतान्नवपञ्चमगो वा सप्तमगश्च जलाऽऽगमनाय।।१९।।**

प्रावृड्ग्रहणमन्यकालव्युदासार्थम्। प्रावृषि वर्षाकाले शीतकरश्चन्द्रो भृगुपुत्राच्छुक्रात् सप्तमराशिगतः सप्तमराशौ व्यवस्थितः। तत्र च शुभदृष्टः सौम्यग्रहावलोकितस्तदा जलाऽऽगमनाय वर्षाऽऽगमनाय भवतीति। अथवा सूर्यसुतात् सौरात् स एव चन्द्रो नवमगः पञ्चमगो वा सप्तमगश्च यदि भवति स च शुभदृष्टस्तदा जलाऽऽगमनाय वर्षाऽऽगमनाय भवतीति।

अन्यद्वर्षलक्षणमाह-

**प्रायो ग्रहाणामुदयास्तकाले समागमे मण्डलसंक्रमे च।**

**पक्षक्षये तीक्ष्णकरायनान्ते वृष्टिर्गतेऽर्के नियमेन चार्द्राम।।२०।।**

**समागमे पतति जलं ज्ञशुक्रयोर्ज्ञजीवयोर्गुरुसितयोश्च सङ्गमे।**

**यमारयोः पवनहुताशजं भयं ह्यदुष्टयोरसहितयोश्च सद्ग्रहैः।।२१।।**

ज्ञो बुधः। शुक्रो भार्गवः। तयोर्ज्ञशुक्रयोः समागमे संयोगे जलं पानीयं पतति वर्षतीत्यर्थः। तथा ज्ञजीवयोर्बुधबुहस्पत्योः सङ्गमे संयोगे जलं पतति। गुरुतियोर्जीवशुक्रयोः सङ्गमे जलं पतति। यमारयोः सौराङ्गारकयोः सङ्गमे पवनहुताशजं भयं भवति। पवनो वायुः। हुताशोऽग्निः। तज्जं भयं भवति। किं सर्वदा। न, इत्याह- अदृष्टयोरसहितयोश्च सद्ग्रहैरिति। सद्ग्रहा बुधबृहस्पति-शुक्राः। एतेषामन्यमतेनादृष्टयो-रनवलोकतयोरसहितयोरसंयुक्तयोः पवनहुताशजं भयं भवति। युक्तदृष्टयोर्नेति।

अन्यद्वर्षज्ञानमाह-

**अग्रतः पृष्ठतो वापि ग्रहाः सूर्यावलम्बिनः।**

**यदा तदा प्रकुर्वन्ति महीमेकार्णवामिव।।२२।।**

सूर्यावलम्बिनो ग्रहाः सूर्यावलम्बनशीलाः। अस्तमयाभिलाषिण इत्यर्थः। अग्रतः पृष्ठतो वा भवन्ति। अग्रतः पुरस्तात्। पृष्ठतः पश्चात्। मन्दग्रहा अग्रतोऽस्तमयं यान्ति। शीघ्रग्रहाः पृष्ठतः। सूर्यस्य प्राक्पश्चाद्वा पद्यस्तमयं कुर्वन्ति, यदा यस्मिन् काले, तदा तस्मिन् काले महीं भूमिमेकार्णवां सर्वजलमयीं कुर्वन्तीत्यर्थः। बहुवचननिर्देशादयादयो ग्रहा ज्ञेया इति।।

**प्रविशति यदि खद्योतो जलदसमीपेषु रजनीषु।**

**केदारपूरमधिकं वर्षति देवस्तदा न चिरता्।।२३।।**

**वर्षत्यपि रटति तदा गोमायुद्ध प्रदोषवेलायाम्।**

**सप्ताहं दुर्दिनमपि तदा पयो नात्र सन्देहः।।२४।।**